सुभाषित व्याकरण - 8

Subhashit Grammar - 8

Compiler: Kishore Nayak
Editor: Padmakar Gangatirkar

रविवार मार्गषीर्श कृष्ण त्रयोदशी १९४२, शर्वरी संवत्सर

आदौ तु मन्दमन्दानि मध्ये समरसानि च।
अन्ते स्नेहायमानानि संगतान्युत्तमैः सह ॥५३॥ -महा सुभाषित संग्रह

उत्तमैः (बुधैः) सह संगतानि आदौ तु मन्दमन्दानि (भवन्ति), मध्ये (तानि) समरसानि च, (तथा) अन्ते (तानि) स्नेहायमानानि (भवन्ति) ॥

Friendships with the learned persons progress slowly in the beginning. (Then, it progresses) moderately at the intermediate stage (limited to mutual well-being) and very friendly (cordially) at the end.

उत्तमैः & बुधैः-पु. लिं. तृ. वि. ब. व. of उत्तम-the best & बुध- learned, knowledgeable सह-अव्यय -with, together, संगतानि, मन्दमन्दानि, समरसानि & स्नेहायमानानि- all न. लिं. प्र. वि. ब. व. of संगत- association, friendship (क. भू. धा. वि. of सं+गम्-to cohabit, to come together-गम्-गच्छति १ ग. प. प. to go), मन्दमन्द- slowly-(मन्दम् च मन्दम् च -द्वंद्व स.- मन्द -slow), समरस-limited to mutual well-being, moderate -समः (समानः) -equal, same, similar, common रसः - interest, taste, desire- कर्मधारय स. & स्नेहायमान-affectionate, very friendly आदौ- स. वि. ए. व. of आदि- begining, commencement, तु-अव्यय- but, on the other hand, as to, मध्ये & अन्ते- स. वि. ए. व. of मध्य-adjctv-middle, intervening & अन्त-adjctv-end, conclusion, च-and

आरंभगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृध्दिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना
छायेव मैत्री खलसज्जनानाम् ॥५४॥ नीतिशतक

खलसज्जनानाम् मैत्री आरंभ-गुर्वी, क्रमेण क्षयिणी, दिनस्य पूर्वार्ध-परार्ध-भिन्ना छाया इव, पुरा लघ्वी, पश्चात् वृध्दिमती च (भवति)।

The friendship between a wicked person and a gentleman is close (great) in the beginning, diminishing with the time (and gets very close again later), like (a long shadow) in the morning, (a short shadow) at noon and (a long shadow) in the evening of a day.

खलसज्जनानाम्- ष. वि. ब. व. of खलसज्जन- खलः च सज्जनः च-द्वंद्व स.-खल-wicked person, सज्जन-noble person/ gentleman, मैत्री- स्त्री लिं.- friendship, आरंभ- beginning, commencement, गुर्वी-स्त्री लिं.-(गुरु पु/न. लिं.)-Adjctv-great, heavy, big, enlarged-(also means pregnant women), क्रमेण- slowly-तृ. वि. ए. व. of क्रम- order, sequence, step, performance, क्षयिणी-स्त्री लिं.-(क्षयिन् -पु/न. लिं.)-Adjctv- diminishing, reducing, दिनस्य-of the day-ष. वि. ए.

व. of दिन-day, पूर्वार्ध-first-half, परार्ध-second-half, पूर्व-adjctv-earlier, first, पर-adjctv-next, the other, अर्ध-half, पूर्वम् अर्धम् & परम् अर्धम् - both कर्मधारय स. स., पूर्वार्धम् च परार्धम् च - पूर्वार्धपरार्ध- द्वंद्व स.- पूर्वार्धपरार्धयो: भिन्ना इति-पूर्वार्धपरार्धभिन्ना- सप्तमि तत्पुरुष स., भिन्ना- different, separate- & छाया- shadow both in स्त्री. लिं. प्र. वि. ए. व.-भिन्न-क. भू. धा. वि. of भिद्- ७ ग. उ. प. भिनत्ति-भिंत्ते to break, separate, इव-अव्यय- like, similar to, लघ्वी-स्त्री लिं.-(लघु पु/न. लिं.)-adjctv- light, less, small, पश्चात्-अव्यय- later, from the back, behind, वृध्दिमती- increasing, growing- स्त्री. लिं. प्र. वि. ए. व. of वृध्दिमत्-वर्त. का. वा. धा. सा. वि. of वृध्-वर्धते १ ग. आ. प. to grow, increase, च- and

कीटोऽपि सुमनःसंगादारोहति सतां शिरः
अश्मापि याति देवत्वम् महद्भिः सुप्रतिष्टितः ॥५५॥ -हितोपदेश

कीटः अपि सुमनःसंगात् सतां शिरः आरोहति। महद्भिः सुप्रतिष्टितः अश्मः अपि देवत्वम् याति

Even an insect in the company of a jasmine flower is able to climb over the heads of virtuous persons. Even a stone begets divinity when properly consecrated by great persons.

कीटः - insect, worm & अश्मः -(अश्मन्)- stone & सुप्रतिष्टितः- well consecrated, installed (सु- अव्यय-a particle often used to mean- well, beautiful, properly, easily very much- प्रतिष्टित- प्रयोजक क. भू. धा. वि. of प्र+स्था (स्था-तिष्ठति १ ग. प. प.-to stand, stay - प्रयोजक स्थापयति-ते- install, to found)-all in पु. लिं. प्र. वि. ए. व., अपि- अव्यय- even, also, and, सुमनःसंगात् -पं. वि. ए. व. Of सुमनःसंगम्- company of a flower- (सुमनानां संगम् षष्ठी तत्पु.स.), सतां -ष. वि. ब. व. of सत्-virtuous, holy, शिरः & देवत्वम्-द्वि. वि. ए. व. Of शिरस्-(न. लिं.)-Head & देवत्व- divinity, आरोहति & याति both- वर्त. तृ. पु. ए. व. Of आ+रुह्-to mount, ascend, ride, climb -(रुह्-रोहति १ ग. प. प. to grow, germinate) & या-२ ग. प. प. to go, happen, come to pass, महद्भिः-तृ. वि. ब. व. Of महत्- great, big, important

क्वचिद्भूमौ शय्या, क्वचिदपि च पर्यङ्कशयनः
क्वचित् शाकाहारी, क्वचिदपि च शाल्योदनरूचिः।
क्वचित् कन्थाधारी, क्वचिदपि च दिव्याम्बरधरो
मनस्वी कार्यार्थी न गणयति दुःखं न च सुखम् ॥५६॥ -भतृहरि नीतिशतक

(सः) क्वचित् भूमौ शय्या (करोति), क्वचित् अपि च पर्यङ्क-शयनः (करोति) । (सः) क्वचित् शाकाहारी (भवति), क्वचिदपि च शाल्योदन-रूचिः (अत्ति) । (सः) क्वचित् कन्थाधारी (भवति), क्वचित् अपि च दिव्याम्बरधरः, (अस्ति) ।(सः), मनस्वी कार्यार्थी, दुःखम्, सुखम् च न गणयति॥

Sometimes he sleeps on the floor and sometimes he sleeps on fine bed. Sometimes he manages with vegetables only and sometimes he eats delicious rice dishes. Sometimes he wears patched clothes and sometimes he wears splendid garments! That steady-minded person, determined to achieve his goal, does not care about his sorrow or happiness.

क्वचित् -क्व-अव्यय-where, whither-क्व+चित्- means-sometimes, in some cases,भूमौ-स. वि. ए. व. of भूमिः-स्त्री. लिं. -ground, earth, शय्या-स्त्री. लिं.-bed, अपि-अव्यय-also, even, and, च-and, पर्यङ्क- couch, sofa, शयन- sleeping-पर्यङ्के शयन: -पर्यङ्कशयन: -स. तत्पुरुष तत्पुरुष स., शाकाहारी-(शाकाहारिन्)- vegetable eater, शाल्योदन-रूचि: -taste of delicious rice dishes- शालिः -rice-आदनः food, dishes. शाल्याः ओदनः -ष तत्पुरुष स., कन्थाधारी-(कन्थाधारन्)-wearing rags-कन्था-patched garment, rags. कन्थाम् धारयति इति-कन्थाधारिन्- उपपद तत्पुरुष स, -दिव्य- divine, splendid, अम्बर-dress, दिव्यम् अम्बरम् -दिव्याम्बरम् -कर्मधारय स. दिव्याम्बरधरः - दिव्याम्बराणि धारयति इति -दिव्याम्बरधरः - उपपद तत्पुरुष स., मनस्वी-(मनस्विन्)- stead-minded person, intelligent person, कार्यार्थी-(कार्यार्थिन्) -determined to achieve the object, दुःखम्- sorrow, सुखम्-happiness -all in प्र. वि. ए. व., न- no, not, गणयति-वर्त. तृ. पु. ए. व. of गण्-१० ग. उ. to count, regard, consider, think

क्षुत्क्षामोऽपि जराकृशोऽपि शिथिलप्रायोऽपि
कष्टां दशामापन्नोऽपि विपन्नदीधिति अपि प्राणेषु नश्यत्स्युपि।
मत्तेभेन्द्रविभिन्नकुम्भपिशितग्रासैकबद्धस्पृहः
किं जीर्णतृणमत्ति मानमहतामग्रेसरः, केसरी ॥५७॥ -भतृहरि नीतिशतक श्लो २१

मत्त-इभेन्द्र-विभिन्न-कुम्भ-पिशित-ग्रास-एकबद्ध-स्पृहः, मान-महताम्-अग्रेसरः, केसरी, क्षुद्-क्षामः अपि, जरा-कृशः अपि, शिथिल-प्रायः अपि, कष्टां दशाम् आपन्नः अपि, विपन्नदीधितिः अपि, प्राणेषु नश्यत्सु अपि, किं जीर्णतृणम् अत्ति?

The lion, addicted to and longing for the flesh from the split forehead of a lord of elephant in rut and the one for whom self prestige is of utmost importance, will ever eat dry grass, even if, he is emaciated with hunger, thinned down by the old age, feeling weak and is in a miserable state, lost his energy and is dying.

मत्त-intoxicated, drunk-क.भू. धा. वि. of मद्-माद्यति ४ ग. प. प. to be drunk, mad or intoxicated, इभः - elephant- इभेन्द्र-king of elephants- इभेषु इन्द्रः -स. तत्पुरुष स., विभिन्न- क.भू. धा. वि. of वि+भिद्-भिनत्ति-भिंत्ते ७ ग. उ. प. to break, split, कुम्भ-pitcher, the frontal globe on the forehead of the elephant, पिशित- flesh, ग्रास- mouthful, food, एकबद्ध- addicted, स्पृहः - desirous, yearning, मान- prestige- मानमहताम्-ष. वि. ब. व. of मानमहत्- मानः महत् यस्य सः -बहुव्रीहि स., अग्रेसरः-leader, foremost, केसरी-प्र. वि. ए. व. of केसरिन्- -पु.

लिं.-lion, क्षुध्-(स्त्री. लिं.)- Hunger, क्षाम-adjctv-emaciated- क्षुधया क्षामः- तृ. तत्पुरुष स., अपि-अव्यय-even, though, जरा-old age, कृशः - thinned, emaciated- जरया कृशः - तृ. तत्पुरुष स., शिथिल- feeble, weak, प्रायः (प्रायस्)-अव्यय -mostly, generally, कष्टाम् & दशाम् -स्त्री. लिं. द्वि. वि. ए. व. of कष्टा-bad, difficult, दशा-state, time, आपन्न-afflicted, reduced to, arrived - क.भू. धा. वि. of आ+पद्- (पद्-पद्यते-४ ग. आ. प. to go, approach), विपन्न-lost, destroyed- क.भू. धा. वि. of वि+पद्, दीधितिः -bodily lustre, energy, प्राणेषु & नश्यत्सु -पु/न. लिं. स. वि. ब. व. of प्राण-life, breath & नश्यत्-वर्त. का. धा. सा. वि. of नश्-नश्यति ४ ग. प. प. to be lost, destroyed, किम् -whether, जीर्ण-adjctv-old, decayed, तृणम् -grass-जीर्णम् तृणम् -उपपद तत्पुरुष स.-जीर्णतृणम् -न. लिं. द्वि. वि. ए. व., अत्ति- वर्त. तृ. पु. ए. व. of अद्-२ ग. प. प.

कुसुमस्तबकस्य इव द्वयीवृत्तिः मनस्विनः ।
मूर्ध्नि वा सर्वलोकस्य शीर्यते वने एव वा ॥५८॥ - नीति शतकं

मनस्विनः कुसुम-स्तबकस्य इव द्वयी-वृत्तिः(भवति)। सर्व-लोकस्य मूर्ध्नि वा(भवति), वने एव वा शीर्यते।

Just like a bunch of flowers, a wise man has only two positions, either be a crown on everyone's head or be at the forest (floor) to wither away in the forest! (Respectfully retire from the public life).

मनस्विनः, कुसुमस्तबकस्य & सर्वलोकस्य- ष. वि. ए. व. of मनस्विन्- high-souled, determined, wise, कुसुमस्तबक- bunch of flowers, कुसुमं- flower-स्तबक- bunch- कुसुमानाम् स्तबकम्-ष. तत्पुरुष स. & सर्वलोक - entire world, सर्वः लोकः - कर्मधारय स., इव-अव्यय-like, similar to, द्वयी & वृत्तिः - स्त्री. लिं. प्र. वि. द्वि. व. of द्वय-adjctv-two fold, two kinds of, & वृत्ति- स्त्री. लिं. प्र. वि. ए. व nature, characteristic, द्वयीवृत्तिः - द्वास्याःवृत्याः समाहारः - द्विगु समाहार स. मूर्ध्नि- (पु. लिं.) & वने (न. लिं.)- स. वि. ए. व. of मूर्धन्-head & वन -forest, शीर्यते -कर्मणि वर्त. तृ. पु. ए. व. of शॄ (दीर्घ)-शृणाति ९ ग. प. प. to wither, waste away, वा-or, and & एव-just, just so both अव्यय

गवादीनां पयोऽन्येद्युः सद्यो वा जायते दधि ।
क्षीरोदधेस्तु नाद्यापि महतां विकृतिः कुतः ॥५९॥

गवादीनाम् पयः सद्यः वा अन्येद्युः दधि जायते। क्षीरोदधेः तु न अद्यापि (दधि जायते)। महताम् विकृतिः कुतः (भवति) ?

The milk of cattle and other animals gets curdled sooner or later but the milk of legendary ocean of milk never gets curdled. How can deformation occur among the Great?

गवादीनाम् & महताम्-ष. वि. ब. व. of गवादि- cattle etc animals-गो- गौ-पु. लिं ब.व. cattle- आदिः -often at the end of composition means, 'beginning with', 'etc', 'and so on', 'such like', 'and other'-(e. g. देवादि, स्वादि- etc) & महत्- great or noble person, पयः -प्र. वि. ए. व. of पयस्-milk (also means water), अन्येद्युः -अव्यय- following day, one day, सद्यः (सद्यस्)- अव्यय- today, the same day, वा-अव्यय- or, and, दधि-न. लिं.-curd, coagulated milk, thick sour milk, जायते-वर्त. तृ. पु. ए. व. of जन्-४ ग. आ. प. to become, happen, be born, क्षीरोदधेः- ष. वि. ए. व. of क्षीरोदधि- ocean of milk- क्षीर-पु/न. लिं.- milk उदधिः -ocean- (क्षीरस्य उदधिः - षष्ठी तत्पुरुष स.), तु-अव्यय- on the other hand, on the contrary, न-no, not, अद्य-अव्यय- today, this day-अद्यापि-अद्य +अपि- to this day, still, yet, विकृतिः -deformation, wrong doing, कुतः (कुतस्)-अव्यय- from where, where else

गेहं दुर्गतबन्धुभिर्गुरुगृहं छात्रैरहंकारिभिर्-
हट्टं पत्तनवञ्चकैर्मुनिजनैः शापोन्मुखैराश्रमान् ।
सिंहाद्यैश्च वनं खलैर्नृपसभां चौरैर्दिगन्तानपि संकीर्णा-
न्यवलोक्य सत्यसरलः साधुः क्व विश्राम्यति ॥६०॥

गेहं दुर्गत-बन्धुभिः, गुरुगृहम् छात्रैः अहंकारिभिः, हट्टम् पत्तन-वञ्चकैः, आश्रमान् शापोन्मुखैः मुनिजनैः, वनम् सिंहाद्यैः च, नृपसभाम् खलैः, दिगन्तान् चौरैः अपि संकीर्णानि अवलोक्य सत्य-सरलः साधुः क्व विश्राम्यति?

Seeing, home full of poverty ridden relatives, school (Guru's ashram) full of egoistic students (shishyas), market place full of city-swindlers, hermitages full of ever-cursing monks, forest full of beasts like lions, royal court full of cheats and places all around full of thieves, possibly where can a simple, honest noble person find peace (shelter)?

गेहम्-home, residence, गुरुगृहम्-shool, Guru's ashram-गुरोः गृहम्- षष्ठी तत्पुरुष स, हट्टम्- market place, वनम्- forest-all in न. लिं. द्वि. वि. ए. व, आश्रमान्- hermitages & दिगन्तान्- places all around both- पु. लिं. द्वि. वि. ब. व-of आश्रम & दिगन्त, नृपसभाम् -स्त्री. लिं. द्वि. वि. ए. व. of नृपसभा- royal court, दुर्गतबन्धुभिः, छात्रैः, अहंकारिभिः, पत्तनवञ्चकैः, शापोन्मुखैः, मुनिजनैः, सिंहाद्यैः, खलैः, चौरैः all-पु. लिं. तृ. वि. ब. व. of दुर्गतबन्धु-poverty ridden kins-(दुर्गत-poverty ridden-दुर्-अव्यय-means bad, difficult, hard, weak, गत-gone-क. भू. धा. वि. of गम्-गच्छति-१ ग. प. प. to go, छात्र-students, shishyas, अहंकारिन्-egoistic, पत्तनवञ्चक-city-swindler- (पत्तनस्य वञ्चकः- षष्ठी तत्पुरुष स.), शापोन्मुख-ready to curse-(यः शप्तुं उन्मुखः अस्ति सः - बहुव्रीहि स.), मुनिजन-a monk, rushi, सिंहादि-lions etc खल- cheat, swindler, चौर- thief, संकीर्णानि-न. लिं. द्वि. वि. ब. व. of संकीर्ण- to pour out, spread, mix- क. भू. धा. वि. of सं+कृ (दीर्घ) -(कृ (दीर्घ)-६ ग. प. प. किरति-to scatter, throw about, अवलोक्य-seeing, observing- पू. का. वा. धा सा. ल्यबन्त अव्यय of अव+लोक्-(लोक्-लोकते-१ ग. आ. प. to see, view, सत्यसरलः &

साधुः -both पु. लिं. प्र. वि. ए. व. of सत्यसरल-true and simple- सत्यः च सरलः च- द्वंद्व स & साधु-noble, honest, क्व-अव्यय-where, whither, विश्राम्यति-repose, take rest-वर्त. तृ. पु. ए. व. of वि+श्रम्- (श्रम्-श्राम्यति ४ ग. प. प. to exert oneself, take pains, tool, च-and, अपि-अव्यय-also, and

चिन्तामणे भुवि न केनचिदीश्वरेण मूर्ध्ना धृतोऽहमिति मा स्म सखे विषीदः।
नास्त्येव हि त्वदधिरोहणपुण्यजन्म-सौभाग्ययोग्यमिह कस्यचिदुत्तमाङ्गम् ॥६१॥

चिन्तामणे, सखे, भुवि केनचिद् ईश्वरेण 'अहम् मूर्ध्ना न धृतः' इति मा स्म विषीदः। त्वत् अधिरोहण-पुण्य-जन्म-सौभाग्य-योग्यम् उत्तमाङ्गम् हि कस्यचिद् इह न एव अस्ति।

Oh my friend, Chintamani Jewel (wish granting jewel), do not grieve (do not despair) saying, 'No king has worn me on his head'. The head, having earned meritorious birth-fortune worthy of your ascend (mounting), just does not exist in this world.

(This refers to great people who do not get recognition during their lifetime)

चिन्तामणे & सखे - both पु. लिं. सं. वि. ए. व. of चिन्तामणि -Chintamani Jewel & सखा-friend, भुवि - स्त्री. लिं. स. वि. ए. व. of भू- earth, world, केनचिद्-(केन+चित्) -by any -केन, ईश्वरेण & मूर्ध्ना- पु. लिं. तृ. वि. ए. व. of किम्- who, which, ईश्वर-Lord, King & मूर्धन्-head, अहम् & धृतः -प्र. वि. ए. व. of अस्मद् -I, we & धृत-held, worn -क. भू. धा. वि. of धृ-धरति १. ग. प. प. & धारयति-ते १० ग. उ. प. to bear, carry, hold, wear , न- no, not, इति-अव्यय- saying, quoting, मा-अव्यय-a particle of prohibition -lest, that not, स्म-अव्यय-a particle added to the present tense of verbs or to क. भू. धा. वि., indicating past tense- विषीदः -प्र. वि. ए. व. of विषीद-grieve, despair-धा. सा. नाम of वि+सद्-(सद्-सीदति- ६ ग. प. प. to sit, recline), त्वत्-by you-पं. वि. ए. व. of युष्मद्- you, अधिरोहण-ascend, mounting, पुण्य-holy, sacred, जन्म- birth, सौभाग्य- fortune, योग्यम्-worthy, उत्तमाङ्गम् -head, अधिरोहण-ascend, mounting, (पुण्यः जन्मः पुण्यजन्मः-कर्मधारय स. पुण्यजन्मस्य सौभाग्यः -पुण्यजन्मसौभाग्यः & अधिरोहणस्य पुण्यजन्मसौभाग्यः -अधिरोहणपुण्यजन्मसौभाग्यः -both ष. तत्पुरुष स.- अधिरोहणपुण्यजन्मसौभाग्याय योग्यम् -अधिरोहणपुण्यजन्मसौभाग्ययोग्यम्-च. तत्पुरुष स.), हि-अव्यय-indeed, surely, कस्यचिद् -any, whatsoever, whoever, -(कस्य-ष. वि. ए. व. of किम् +चित्)- इह -अव्यय-here, in this place, न- no, not, एव-अव्यय-just, just so, अस्ति-वर्त. तृ. पु. ए. व. of अस्-२ ग. प. प. to be, to exist
.

तरुमूलादिषु निहितं जलमाविर्भवति पल्लवाग्रेषु।
निभृतं यदुपक्रियते तदपि महान्तो वहन्त्युच्चैः ॥६२॥ - सुभाषित रत्न भाण्डागरं

तरुमूलादिषु निहितम् जलम् पल्लवाग्रेषु आविर्भवति। (तथा) महान्तः यद् निभृतम् उपक्रियते, तद् अपि (ते) उच्चैः वहन्ति।

Just as water put at the roots of trees, reaches to the tips of the leaves, the noble persons, obliged even covertly (secretly), acknowledge the help loudly!

तरुमूलादिषु & पल्लवाग्रेषु- स. वि. ब. व. of तरुमूलादि- roots of trees etc तरोः मूलम्-तरुमूलम्- ष. तत्पुरुष स.) & पल्लवाग्र-tips of the leaves- पल्लवानाम् अग्राणि -ष. तत्पुरुष स., निहितम् & जलम्- न. लिं. द्वि. वि. ए. व. of निहित- placed, deposited-क. भू. धा. वि. of नि+हि-(हि-हिनोति ५ ग. प. प. to cast, throw) & जल- water, निभृतम्-अव्यय- secretly, privately, unperceived - (note: निभृत- also means deposited, filled with etc if considered as a क. भू. धा. वि. of नि+भृ-भरति), आविर्भवति- वर्त. तृ. पु. ए. व. of आविर्भू- to manifest, appear, incarnate, महान्तः -पु. लिं. प्रथमा वि. ब. व. of महत्-great, noble, यद् - which, what & तद् - it, that -both in न. लिं. प्र. वि. ए. व., उपक्रियते -कर्मणि प्रयोग तृ. पु. ए. व. of उप+कृ -oblige, help-कृ-करोति-कुरुते ८ ग. उ. प. to do, make, अपि-अव्यय-even then, also, उच्चैः-अव्यय-loudly, powerfully, aloft, वहन्ति- वर्त. तृ. पु. ब. व. of वह्-वहति-ते -to carry, bear, convey

मूलसिक्तस्य वृक्षस्य फलं शाखासु दृश्यते।
तस्माच्छरीरं युञ्जीत तपसा नियमेन च ॥६३॥ -महाभा. वनपर्व अ. २६०

मूलसिक्तस्य वृक्षस्य फलम् शाखासु दृश्यते । तस्मात् शरीरम् तपसा नियमेन च युञ्जीत॥

(Plentiful leaves and fruits) at the (top) branches are the result of water given to the trees at the roots. Similarly, one should harness his body with austerity (excercise) and discipline (of good nutrition) (to see the fruits of long life).

वृक्षस्य & मूलसिक्तस्य -ष. वि. ए. व. of वृक्ष-tree & मूलसिक्त-whose roots are watered-मूल-root, सिक्त- watered-क. भू. धा. वि. of सिच्-सिंचति-ते ६ ग. उ. प. to water, moisten, to sprinkle, scatter in drops-सिक्तम् मूलम् यद् तद् -मूलसिक्त-बहुव्रीहि स., फलम्- प्र. वि. ए. व. of फल- fruit, result, reward, शाखासु-स. वि. ब. व. of शाखा-स्त्री. लिं. -branch, दृश्यते- कर्मणि प्रयोग तृ. पु. ए. व. of दृश्-पश्यति-to see, observe, तस्मात्- पं. वि. ए. व. of तद् & also-अव्यय-because of, for that reason, शरीरम्- द्वि. वि. ए. व. of शरीर- body, तपसा & नियमेन -तृ. वि. ए. व. of तपस् - austerity, pain, merit, moral virtue & नियम-restraint, vow, discipline, च-and, also, युञ्जीत-आ. प. विध्यर्थ तृ. पु. ए. व. of यज्-युनक्ति-युंक्ते ७ ग. उ. प. to use, employ, apply, harness

तृष्णां छिन्धि,भज क्षमां, जहि मदं, पापे रतिं मा कृथाः,
सत्यम् ब्रूह्यनुयाहि साधुपदवीं सेवस्व विद्वज्जनान् ।
मान्यान्मानय, विद्विषोऽप्यनुनय, ह्याच्छादय स्वान्गुणान्-
कीर्तिं पालय, दुःखिते कुरु दयामेतत्सतां लक्षणम् ॥६४॥   -भतृहरि नी.श. & सुभाषितरत्नाकर

तृष्णाम् छिन्धि, क्षमाम् भज, मदम् जहि, पापे रतिम् मा कृथाः, सत्यम् ब्रूहि, साधुपदवीम् अनुयाहि, विद्वज्जनान् सेवस्व, मान्यान् मानय, विद्विषः अपि अनुनय, स्वान् गुणान् हि आच्छादय, कीर्तिम् पालय, दुःखिते दयाम् कुरु । एतद् सताम् लक्षणम् (भवति) ॥

Stay away from greed, adopt forgiveness, avoid arrogance, do not desire for sinful things, speak the Truth, follow noble ways (good habits), serve knowledgeable people, respect those deserving respect, show courtesy even to a enemy, cover up self qualities, preserve self prestige and show compassion to the distressed. This is the list of characteristics of noble people.

तृष्णाम्, क्षमाम्, रतिम्, कीर्तिम्, साधुपदवीम् & दयाम्- all स्त्री. लि. द्वि. वि. ए. व. of तृष्णा-greed, desire, thirst, क्षमा-forgiveness, रतिः - fondness, desire, कीर्तिः-pride, prestige, साधुपदवी- noble ways, good habits-साधु-noble, good- पदवी-way, path- साधुनाम् पदवी- षष्ठी तत्पुरुष स., दया- compassion, kindness, मदम्-पु. लि. द्वि. वि. ए. व. of मद-arrogance, pride, सत्यम्- न. लि. द्वि. वि. ए. व. of सत्य-truth, virtue, विद्वज्जनान्, मान्यान्, स्वान्, गुणान्- पु. लि. द्वि. वि. ब. व. of विद्वज्जन- knowledgeable people विद्वान् जनः- कर्मधारय तत्पुरुष स., मान्य-respectable, स्व-self, one's own, गुण-quality, virtue, दुःखिते-पु. लि. स. वि. ए. व. of दुःखित-distressed, afflicted, पापे-न. लि. स. वि. ए. व. of पाप-sin, wrong thing, छिन्धि, भज, जहि, ब्रूहि, अनुयाहि, मानय, अनुनय, आच्छादय, पालय, कुरु,- all आज्ञार्थ द्वि. पु. ए. व. of छिद्-छिनत्ति-छिंत्ते ७ ग. उ. प. to cut, break, drive off, भज्- भजति-ते १ ग. उ. प. to adopt, follow, practice, हा-जहाति २ ग. प. प. to leave, abandon, ब्रू- ब्रवीति-ब्रूते- २ ग. उ. प. to speak, say, talk, अनु+या-to follow(या-याति २ ग. प. प. to go , to come to, मन्-प्रयोजक -मानयति-१ ग. प. प. to respect- (मन्-मनति -१ ग. प. प. to worship, to be proud of), अनु+नी- to propitiate, appease,- नी-नयति-ते-१ ग. उ. प. to carry, take, आ+छद्- to cover, conceal-छद् -छदति-ते १ ग. उ. प. & छादयति-ते-१० ग. उ. प. to cover, पा-प्रयोजक २ ग. प. प. -पालयति २ ग. प. प. -to protect, keep up, कृ-करोति-कुरुते-८ग. उ. प. to do, make, सेवस्व- आज्ञार्थ आ. प. द्वि. पु. ए. व. of सेव्-सेवते-to serve, विद्विषः -पु. लि. प्र. वि. ए. व. of विद्विष्- enemy, अपि-even, also, and & हि-surely, indeed -both अव्यय, एतद्-this, सताम्-ष. वि. ब. व. of सत्-noble, great, लक्षणम्-न. लिं. प्र. वि. ए. व. of लक्षण-characteristic, quality, मा- particle of prohibition- मा कृथाः- meaning- 'lest', that not'

यस्य चित्तं द्रवीभूतं कृपया सर्वजन्तुषु ।
तस्य ज्ञानेन मोक्षेण किं जटाभस्मलेपनैः ॥६५॥

चित्तम् यस्य सर्वजन्तुषु कृपया द्रवीभूतम्, तस्य ज्ञानेन, मोक्षेण, जटा-भस्मलेपनैः किम् (प्रयोजनम् अस्ति)?

One whose heart melts with compassion for every living being, what is the use of wisdom, liberation, matted hair and adornment with holy-ash ?

चित्तम् & द्रवीभूतम्,- न. लिं. प्र. वि. ए. व. of चित्त- mind, heart, thought, desire & द्रवीभूत- क. भू. धा वि. of द्रवीभू-to melt, liquefy-(भू-भवति १ ग. प. प. to be, to exist), यस्य-whose & तस्य-his -both पु. लिं. ष. वि ए. व. of यद्-which, what & तद्- that, he, सर्वजन्तुषु -पु/न. लिं. स. वि ब. व. of सर्वजन्तु - सर्व-all, entire, जन्तु-living being-सर्वाः जन्तवः -सर्वजन्तु- कर्मधारय स.., कृपया, ज्ञानेन, मोक्षेण-तृ. वि ए. व. of कृपा-(स्त्री. लिं.)-Compassion, ज्ञान-knowledge, wisdom, मोक्ष-Liberation from cycles of birth and death, जटाभस्मलेपनैः-तृ. वि ब. व. of जटाभस्मलेपन-जटा-(स्त्री. लिं.)- Matted hair, भस्मलेपन --(पु/न. लिं.) adornment with holy-ash-भस्म-holy-ash, लेपन-anointing, smearing-भस्मस्य लेपनम्- षष्ठी तत्पु. स., किम् -what, which, जटा च भस्मलेपनः च-जटाभस्मलेपन-द्वंद्व स.

कुचैलिनं दन्तमलोपधारिणं
बह्वाशिनं निष्ठुरभाषिणं च।
सूर्योदये वाऽस्तमिते शयानं
विमुञ्चति श्रीर्यदि चक्रपाणिः ॥ ६६॥ चाणक्यनीतिदर्पण

कुचैलिनम्, दन्त-मल-उपधारिणम्, बह्वाशिनम्, निष्ठुरभाषिणम्, च सूर्योदये वा अस्तमिते शयानम्, यदि चक्रपाणिः (अपि भवति, तदा अपि) श्रीः (तां) विमुञ्चति॥

A person who wears dirty clothes, a person with dirty teeth, a person who eats too much, a harsh speaker and the one who sleeps at sunrise or sunset, even if he is Lord Vishnu, Goddess of wealth (Laxmi) abandons him.

कुचैलिनम्, दन्त-मल-उपधारिणम्, बह्वाशिनम्, निष्ठुरभाषिणम्, शयानम् -all द्वि. वि. ए. व. of कुचैलिन्-wearer of dirty cloth-चैलम्-cloth, कु-अव्यय-a prefix implying bad, dirty - यः कुचैलम् धारयति सः कुचैलिन्-बहुव्रीहि स. (Can be उपपद तत्पु स as कुचैलम् धारयति इति) दन्तमलोपधारिन्-person having unclean teeth- दन्त-tooth, मल-dirt, उपधारिन् -possessor, carrier-दन्तानाम् मलम्-दन्तमलम्-ष. तत्पुरुष स.-दन्तमलम् उपधारयति यः सः- दन्तमलोपधारिन्-बहुव्रीहि स., बह्वाशिन्-gluttonous, over eater- बहु-plenty, repeated, abundant-आशिन्- eater-बहूनि अश्नाति इति-उपपद तत्पुरुष स., निष्ठुरभाषिन्-harsh speaker-निष्ठुर-adjctv-harsh, hard, cruel, भाषिन्- speaker-निष्ठुरं भाषते इति-निष्ठुरभाषिन्-उपपद तत्पुरुष स., शयान (शयिन्)-

sleeper, च-and, also, वा-and, also, सूर्योदये & अस्तमिते -स. वि. ए. व. of सूर्योदय-sunrise (time) & अस्तमित-sunset (time), यदि- अव्यय-even if, in case of, चक्रपाणि:- lord Vishnu श्रीः - Laxmi-Goddess of health, विमुञ्चति- leaves, abandons, -वर्त. तृ. पु. ए. व. of वि+मुच्-(मुच्- मुंचति-ते ६ ग. उ. प. to set free, abandon

कर्पूरधूलीकलितालवाले
कस्तूरिकाकल्पितदोहकश्रीः।
हिमांबुकाभैरभिषिच्यमानः
प्राञ्चं गुणं मुञ्चति नो पलाण्डुः ॥६७॥

कर्पूर-धूली-कलित आलवाले कस्तूरिका-कल्पित-दोहकश्रीः, हिम-अंबुकाभैः अभिषिच्यमानः, पलाण्डुः (आत्मनः) प्राञ्चम् गुणम् नो मुञ्चति।

Onion does not loose (leave) its foremost quality (i.e. its pungent smell) even if it is planted in a basin of camphor powder, tended using best quality food of musk and sprinkled by drops of dew water

कर्पूर-camphor, धूली- powder, कलित-mixed, seized-क. भू. धा. वि. of कल्-कलते १ ग. आ. प. to hold, bear, carry, आलवाले- in the basin स. वि. ए. व. of आलवाल-trench, basin (कर्पूरस्य धूलिः -ष. तत्पुरुष स.-कर्पूरधूलिना कलितम्-तृ. तत्पुरुष स. & कर्पूरधूलीकलितम् आलवालम्- कर्पूरधूलीकलितालवालम्- कर्मधारय स.), कस्तूरिका- musk, कल्पित-adjctv-arranged, formed, tended- (it is also प्रयोजक क. भू. धा. वि कल्पयति-ते-to prepare, to provide-कल्पते १ ग. आ. प., दोहक- food of milk, श्रीः - sufix means 'the best in the lot'-(कस्तूरिकाया कल्पितम्- तृ. तत्पुरुष स.- कस्तूरिकाकल्पितः दोहकः - कर्मधारय तत्पुरुष स.-कस्तूरिकाकल्पितदोहकेषु श्रीः- कस्तूरिकाकल्पितदोहकश्रीः -स. तत्पुरुष स.), हिम-dew, अंबु-water, हिमस्य अंबु -हिमांबु- ष. तत्पुरुष स. हिमांबुकाभैः-तृ. वि. ब. व. of हिमांबुकाभ- हिमांबुक-drop of dew water- अंबुकानाम् आभः-अंबुकाभः -ष. तत्पुरुष स., अभिषिच्यमानः & पलाण्डुः- प्र. वि. ए. व. of अभिषिच्यमान- sprinkled, watered- वर्त. का. वा. धा. सा. वि. of अभि+सिच्-to sprinkle well-(सिंचति-ते ६ ग. उ. प. to sprinkle, to water) & पलाण्डु- (पु. लिं.)-onion, प्राञ्चम् & गुणम् -द्वि. वि. ए. व. of प्राञ्च्- (प्राच्)-adjctv- foremost, dominant & गुण- quality, characteristic, नो -अव्यय-(न+उ) - no not, मुञ्चति- वर्त. तृ. पु. ए. व. of मुच्- मुंचति-ते ६ ग. उ. प. to loose, set free, to drop,

एकमेवाक्षरं यस्तु गुरुः शिष्यं प्रबोधयेत् ।
पृथिव्यां नास्ति तद्द्रव्यं यद् दत्त्वा चानृणी भवेत् ॥६८॥ चाणक्य नीति. १५.२

यः गुरुः एकम् एव अक्षरम् तु शिष्यम् प्रबोधयेत्, पृथिव्याम् तद् द्रव्यम् न अस्ति, यद् दत्त्वा (सः शिष्यः) च अनृणी भवेत् ।

For the Guru (Teacher), who has taught the Shishya (student), even a single (awakening) alphabet, no wealth available in this world to give it to him that will make the student debt free.

यः, गुरुः, अनृणी, द्रव्यम् , यद्, तद् - all प्र. वि. ए. व. of यद्-(पु. लि.)-who, गुरु- (पु. लि.)- teacher अनृणिन् (पु. लि.)- one who is debt free -(न ऋणम् -अनृणम्-नञ्तत्पुरुष स.), द्रव्य- wealth, यद्-which- तद्- that- all न. लिं., एकम्, अक्षरम् & शिष्यम्, -द्वि. वि. ए. व. of एक- one, single, अक्षर- letter, alphabet- both -न. लिं. & शिष्य-student-पु. लि., एव- just, just so, तु- as to, but, as for, even , प्रबोधयेत् - विध्यर्थ तृ. पु. ए. व. of प्रयोजक of प्र+बुध्-to awaken, to make known- (बुध्-१ ग. उ. प. बोधति-ते & ४ ग. आ. बुध्यते- to know, comprehend, भवेत् - विध्यर्थ तृ. पु. ए. व of भू- भवति १ ग.प.प. to become, to happen दत्त्वा-पू. का. वा. त्वान्त धा. सा. अव्यय-of दा-यच्छति १ ग. प. प. & दा-ददाति-दत्ते-३ ग उ. प.- to give, grant, च-and, also पृथिव्याम्- स्त्री. लिं. स. वि. ए. व. of of पृथिवी - the world, earth, न-no, not, अस्ति- वर्त. तृ. पु. ए. व. of अस्- to be, to exist.

परदारापरद्रव्यपरद्रोहपराङ्गमुखः।
गङ्गा ब्रूते कदागत्य मामयं पावयिष्यति ॥ ६९ ॥ - सुभाषित रत्न भाण्डागारं

' कदा अयम् परदारा-परद्रव्य-परद्रोह-पराङ्मुखः (नरः)आगत्य माम् पावयिष्यति ?' (इति) गङ्गा ब्रूते।

(Holy River) Ganga says, 'When will this man, who stays away from others' wives, others' wealth and treachery to others', come to me and purify me ?'

माम् -me द्वि.वि.ए.व. of अस्मद्- I, we परदारा-others' wives- पर-other, दारा- wife (always plural)- पराणाम् दारा, द्रव्य- wealth, परस्य द्रव्यम् -परद्रव्य-others' wealth-both ष. तत्पुरुष स., द्रोह-treachery, पराय द्रोहम्- परद्रोहम्-treachery to others, च.तत्पुरुष स., पराङ्मुखः & अयम्- both पु.लिं. प्र.वि.ए. व. of पराङ्मुख- shunning the face away, one who avoids (परांच्-adjctv- situated beyond, on the other side -परांच् मुखः यस्य सः -बहुव्रीहि स.) & इदम्- he, this person, कदा-अव्यय-when, at what time, आगत्य-पू.का.वा. धा सा.ल्यबन्त अव्यय of आ+गम्-to come - (गम्-गच्छति १ ग. प. प. to go), पावयिष्यति- सामान्य (द्वि.) भविष्य तृ. पु. ए. व. of पू- प्रयोजक - पावयति- to make pure- (पू-पवते, पूयते ४ आ. प. & -पुनाति-पुनीते ९ ग. उ. प. to cleanse, make pure) गङ्गा- Ganges River- स्त्री. लिं. प्र. वि. ए. व., ब्रूते-आ. प. वर्त. तृ. पु. ए. व. of ब्रू-ब्रुवति-ब्रूते २ ग. उ. प. to say, talk

प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे ।
अनुहुंकुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ॥ ७० ॥

अदत्त शपमानाय, चेदिभूभुजे, केशवः न प्रति-वाचम् (करोति) । केसरी घनध्वनिम् हि अनुहुंकुरुते, न गोमायुरुतानि (अनुहुंकुरुते) ॥

(During Yudhishthir's Rajsooya Yagnya) When the King of Chedi (Shishupala) was improperly cursing Keshava, he did not respond. A lion roars in response to the thundering of the clouds and not to the howling of the jackals!

अदत्त-adjctv-improperly, unjustly, शपमानाय & चेदिभूभुजे- पु. लिं. च. वि. ए. व. of शपमान-condemning, cursing -वर्त. का. वा. धा. सा. वि. of शप्-शपति-ते १ ग. उ. प. & शप्यति-ते ४. ग. उ. प. to curse, to swear, abuse & चेदिभूभुज्- King of Chedi- चेदिः- Kingdom of Chedi, भूभुज्-King -भुवम् भुनक्ति इति- उपपद तत्पुरुष स., चेदेः भूभुजः – ष. तत्पुरुष स., केशवः - Krishna, न -no, not, प्रतिवाचम्- द्वि. वि. ए. व. of प्रतिवाच्- reply, response- (प्रति-अव्यय-as prefix to verb or noun derived from verb it means- towards, against, back in return, again, counter & वाच्-स्त्री. लिं.-a word, talk, speech, language, केसरी- पु. लिं. प्र. वि. ए. व. of केसरिन्- lion, गोमायुरुतानि- न लिं. प्र. वि. ब. व. of गोमायुरुत-गोमिन्-पु. लिं.- a jackal- रुतम्-cry, howling- गोमिनः रुतम्-गोमायुरुतम्- ष. तत्पुरुष स., अनुहुंकुरुते-वर्त. तृ. पु. ए. व. of अनु+हुं+कृ-to roar in response- (कृ-करोति-कुरुते-८ ग. उ. प. to do, make), घनध्वनिम्-द्वि. वि. ए. व. of घनध्वनि- घनः -पु. लिं.-cloud- ध्वनिः-sound, noise, roar- घनानाम् ध्वनिः -ष. तत्पुरुष स. न -not, हि-अव्यय-surely, indeed

मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति |
अपि निर्वाणमायाती नानलो याति शीतताम् ॥ ७१ ॥ - हितोपदेश

मनस्वी कामम् म्रियते, कार्पण्यम् न तु गच्छति। अनलः निर्वाणम् आयाति, अपि न शीतताम् याति।

Any wise person would prefer death to humiliation. Fire will cease to exist, but never get cold.

मनस्वी & अनलः both -प्र. वि. ए. व. of मनस्विन्- Wise, High minded & अनल- fire, कामम्-अव्यय-willingly, happily, indeed म्रियते- ६ ग. आ. प. वर्त. तृ. पु. ए. व. of मृ- to die, perish, कार्पण्यम्, निर्वाणम् & शीतताम्-all-द्वि. वि. ए. व. of कार्पण्य- indigence, imbecility, निर्वाण-extinction, death, blown or put out & शीतता- coolness, coldness, न- no not, तु -अव्यय-indeed, easily, surely, गच्छति, आयाति & याति- व्रत. तृ. पु. ए. व. of गम्-१ ग. प. प. to go, to

become, आ+या-२ ग. प. प. to come to, to become & या- २ ग. प. प. -to go, to undertake, अपि- अव्यय- also, and, even, but

मातृवत् परदारेषु परद्रव्येषु लोष्टवत्।
आत्मवत् सर्वभूतेषु यः पश्यति सः पण्डितः॥७२॥

Version 2:
मातृवत् परदाराणि परद्रव्याणि लोष्ठवत् ।
आत्मवत् सर्वभूतानि वीक्षन्ते धर्मबुद्धयः॥

यः परदारेषु मातृवत्, परद्रव्येषु लोष्टवत्, सर्वभूतेषु आत्मवत्, पश्यति, सः पण्डितः (भवति)।
(धर्मबुद्धयः परदाराणि मातृवत्, परद्रव्याणि लोष्ठवत्, सर्वभूतानि आत्मवत् वीक्षन्ते ।)

One who looks at other's wife same as his mother, treats others' wealth as lumps of clay and sees all living beings as his own self, is indeed an intelligent (& a Dharmik) person.

यः, सः & पण्डितः -all पु. लिं. प्र. वि. ए. व. of यद्-who, which person, तद्-he & पण्डित-wiseman, intelligent person, परदारेषु, परद्रव्येषु & सर्वभूतेषु -स. वि. ब . व. of परदारा- wife of other person -दारा-wife-स्त्री. लिं.-always plural- पर-adjctv-other, another, different- पराणाम् दारा- षष्ठी तत्पुरुष स., परद्रव्य- wealth of others- द्रव्यम्-wealth-न. लिं.- पराणाम् द्रव्यम्-षष्ठी तत्पुरुष स. & सर्वभूत-all living being- सर्व-whole, entire, all, भूत-any living being- सर्वा: भूता:- कर्मधारय स.   मातृ- mother, लोष्ट-lump, lump of earth, आत्मन्- पु. लि.-self, one's own, वत्-adjctv-an affix added to nouns indicates 'likeness' 'similarity' 'resemblances' पश्यति-वर्त. तृ. पु. ए. व. of दृश्-१ ग. प. प. to see, look at. वीक्षन्ते -वि+ईक्षन्ते- तृ.पु.ब.व. of वि +ईक्ष् - १ आ.प. - to percieve धर्मबुद्धयः - प्र.वि.ब.व. of धर्मबुद्धि- यस्य बुद्धि धर्म: एव अस्ति स:- बहुव्रीहि स

श्लोकस्तु श्लोकतां याति, यत्र तिष्ठन्ति साधवः |
लकारो लुप्यते तत्र, यत्र तिष्ठन्त्यसाधवः ॥ ७३॥

यत्र साधवः तिष्ठन्ति, श्लोकः तु श्लोकताम् याति। यत्र असाधवः तिष्ठन्ति, तत्र लकारः लुप्यते ॥
(शोक: तु शोकताम् याति।)

In an assembly of virtuous (right/fit/well-disposed/proper) persons, recitation of any extolling hymn -श्लोक is appreciated fully. In an assembly of bad persons, the alphabet 'la' gets dropped from the word 'Shloka' making it 'shoka' (शोक -sorrow, grief) and the assembly becomes unruly due to sorrow ! (The effect is just the opposite!)

साधवः & असाधवः -पु. लिं. प्र. वि. ब. व. of साधु-virtuous (right/fit/well-disposed/proper) person & असाधु- wicked, mean, ignorant person -न साधु- नञ्तत्पुरुष स., यत्र - where, in which place & तत्र- there, in that place-both- अव्यय, तिष्ठन्ति- वर्त. तृ. पु. ब. व. of स्था-तिष्ठति- १ ग. प. प.- to stay, stand, श्लोकः & लकारः -पु. लिं. प्र. वि. ए. व. of श्लोक-extolling, hymn, verse of praise, proverb, saying & लकार- alphabet 'la', तु- अव्यय- on the contrary, however, indeed, श्लोकताम्-स्त्री. लिं. द्वि. वि. ए. व. of श्लोकता- appreciation, extolling, याति- वर्त. तृ. पु. ए. व. of या-२ ग. प. प. to go, to come to, become, लुप्यते- to get deleted- कर्मणि प्रयोग-वर्त. तृ. पु. ए. व. of- लुप्-लुंपति-ते-६ ग. उ. प. to cut off, to take away, suppress; शोकता -sorrowful, unruly

ये दीनेषु दयालवः स्पृशति यानल्पोऽपि न श्रीमदो
व्यग्राः ये च परोपकारकरणे हृष्यन्ति ये याचिताः।
स्वस्थाः सन्ति च यौवनोन्मदमहाव्याधिप्रकोपेऽपि ये
तैः स्तम्भैरिव सुस्थितैः कलिभराक्लान्ता धरा धार्यते ॥ ७४॥

ये दीनेषु दयालवः (सन्ति), यान् अल्पः अपि श्रीमदो न स्पृशति, ये परोपकारकरणे च व्यग्राः (सन्ति), ये याचिताः हृष्यन्ति, ये च यौवनोन्मद-महाव्याधिप्रकोपे अपि स्वस्थाः सन्ति, तैः कलिभाराक्लान्ता धरा, सुस्थितैः स्तम्भैः इव धार्यते।

Those with compassion for the distressed, the wealthy who are not arrogant , those who are always benevolent to others, those who are happy top give when asked, those who stay steady in the prime of their youth or when suffering from great ailment, support this earth, worn out due to the excessive crimes of present age (Kaliyug), like well-positioned columns.

ये, व्यग्राः, याचिताः, स्वस्थाः & दयालवः- पु. लिं. प्र. वि. ब. व. of यद्- who, व्यग्र- engaged, busy, याचित-asked, begged, solicited-क. भू. धा. वि. of याच्-याचते-१ ग. आ. प. to beg, ask, स्वस्थ- (सु+स्थ) -healthy, happy,- सु-well, good & स्थ-standing, being- both adjctvs & दयालु- adjctv- compassionate, kind, दीनेषु- पु. लिं. स. वि. ब. व. of दीन- adjctv- poor, distressed, यान् -पु. लिं. द्वि. वि. ब. व. of यद्-who, अल्पः , श्रीमदः- प्र. वि. ए. व. of अल्प-adjctv- small quantity, little, श्रीमद- arrogance due to wealth-श्री-wealth, मद-arrogance, intoxication- श्रियः मदः -ष. तत्पुरुष स.,अपि-अव्यय-even, also, न-no, not, स्पृशति-वर्त. तृ. पु. ए. व. of स्पृश्-६ ग. प. प. to touch, attain, परोपकारकरणे & यौवनोन्मदमहाव्याधिप्रकोपे-स. वि. ए. व. of परोपकारकरण- doing benevolence to others, helping other- पर-other, different, उपकार-benevolence, help, करण-doing, परेषु उपकारम्- परोपकारम् -स तत्पुरुष स., परोपकारस्य करणम्- परोपकारकरणम् -ष. तत्पुरुष स. & यौवनोन्मदमहाव्याधिप्रकोप- arrogance of youth and

distress due to great physical ailment-यौवन- youth-उन्मद-arrogance, intoxication- यौवनस्य उन्मदः- यौवनोन्मदः -ष. तत्पुरुष स., महान्- great, big, व्याधि-physical ailment, sickness, महान् व्याधि- महाव्याधि- कर्मधारय स. यौवनोन्मदः च महाव्याधिः च -यौवनोन्मदमहाव्याधिः -द्वंद्व स., प्रकोप-wrath, passion यौवनोन्मदमहाव्याधेः प्रकोपः -यौवनोन्मदमहाव्याधिप्रकोप-ष. तत्पुरुष स.,च-and also, हृष्यन्ति & सन्ति- वर्त. तृ. पु. ब. व. of हृष्-हर्षति १ ग. प. प. & हृष्यति- ४ ग प. प. to be delighted, happy, अपि-also, and, तैः by them, सुस्थितैः - by well positioned, स्तम्भैः by columns, all तृ. वि. ब. व. of तद् -he, सुस्थित-well positioned - सु-well & स्थित-standing, staying- क. भू. धा. वि. of स्था-तिष्ठति १ ग. प. प. to stand, stay & स्तम्भ-column, कलिभाराक्लान्ता-worn out due to the excessive crime of present age (Kaliyug) & धरा-earth- both in स्त्री. लिं. प्र. वि. ए. व.(कलिः-Kaliyug, भार-weight, कलेः भारम्-कलिभारम्-ष. तत्पुरुष स., आक्लान्ता- distressed-आक्लान्त-क. भू. धा. वि. of आ+क्लम्- (क्लम् क्लामति १ ग. प. प. & ४ ग. प. प. क्लाम्यति-to be fatigued, exhausted)-कलिभारेण आक्लान्ता- तृ. तत्पुरुष स.,, इव- अव्यय-like, similar to, धार्यते-कर्मणि प्रयोग तृ. वि. ए. व. of धृ-धरति-ते-धारयति-ते १ & १० ग. उ. प. to hold, bear

रत्नैरापूरितस्यापि मदलेशः अस्ति नाम्बुधेः।
मुक्ताः कतिपयाः प्राप्य मातङ्गाः मदविह्वलाः ॥७५॥

अम्बुधेः, रत्नैः आपूरितस्य अपि, मदलेशः न अस्ति। मातङ्गाः, कतिपयाः मुक्ताः प्राप्य, मद-विह्वलाः (भवन्ति)।

The Ocean, though full of jewels, does not possess a bit of pride, and while elephants with handful of pearls get terribly agitated!
(Male elephant in rut is supposed to possess pearls in their foreheads)

अम्बुधेः & आपूरितस्य -both पु. लिं. ष. वि. ए. व. of अम्बुधिः -ocean & आपूरित- abundant, plenty, filled with- प्रयोजक क. भू. धा. वि. of आ+पूर्-आपूरयति-ते- (पूर्-पूर्यते- ४ ग. आ. प. to fill), रत्नैः- न. लिं. तृ. वि. ब. व. of रत्नम्- jewel, अपि-अव्यय-also, even, and, मदलेशः- प्र. वि. ए. व. of मदलेश- little bit of pride- मदस्य लेशः -ष. तत्पुरुष स., न- no, not, अस्ति-वर्त. तृ. पु. ए. व. of अस्-२ ग. प. प. to be, to exist, मातङ्गाः, मुक्ताः, कतिपयाः & विह्वलाः - all प्र. वि. ब. व. of मातङ्ग-पु. लिं.- Elephant, मुक्ता- स्त्री. लिं.- Pearl, कतिपय- adjctv-some, a few, विह्वल-adjctv- agitated, perturbed-(मदेन विह्वलः -मदविह्वलः- agitated by rut -तृ. तत्पुरुष स.), प्राप्य- after getting, receiving-पू. का. वा. ल्यबन्त धा. सा. अव्यय प्र+आप् -(आप्-आप्नोति ५ ग. प. प. to attain, get)

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाचः।
करणं परोपकरणं येषां केषां न ते वन्द्याः ॥ ७६॥

येषाम् वदनं प्रसाद-सदनम्, हृदयम् सदयम्, वाचः सुधामुचः, करणम् परोपकरणम् (सन्ति), ते केषाम् न वन्द्याः (भवन्ति) ?

Who do not venerate the persons, whose face is a storehouse of pleasantries, whose heart is full with compassion, whose speech is exhilarating nectar and whoes deeds are for the benevolence of others?

येषाम् -whose & केषाम् -to whom both पु. लिं. ष. वि. ब. of यद्- who & किम् -who वदनं प्रसादसदनम्, हृदयम् , सदयम्, करणम्, परोपकरणम् -all- प्र. वि. ए. व. of वदन-न. लिं.- face, mouth, प्रसादसदन-प्रसाद-pleasant, kindness, serenity goodness, purity, सदन-न. लिं.- house, abode-प्रसादस्य सदनम्- ष. तत्पुरुष स., हृदय- heart, mind, सदय-दयया सहितम्- तृ. तत्पुरुष स with compassion, kindness, करण-न. लिं. -deed, परोपकरण- benevolence to others पर-other उपकरण-doing service, favor- पराय उपकरणम्-च. तत्पुरुष स., वाचः & सुधामुचः both- स्त्री. लिं. प्र. वि. ब. व. of वाच् - speech सुधामुच्- exhilarating nectar, सुधाम् मुंचति इति -उपपद तत्पुरुष स., ते- they & वन्द्याः - venerable-both पु. लिं. प्र. वि. ब. व. of तद्-he & वन्द्य-adjctv, न-no, not

वेदाढ्याः वृत्तसंपन्नाः ज्ञानवन्तः तपस्विनः।
यत्र तिष्ठन्ति वै विप्राः तद्गाम नगरं नृप ॥ ७७ ॥ - महाभा. वन. अ-२००.९९

(मार्कण्डेय ऋषिणा युधिष्ठिराय तस्य वनवाससमये उक्तम्)
नृप, यत्र वेदाढ्याः, वृत्तसंपन्नाः, ज्ञानवन्तः, तपस्विनः, विप्राः तिष्ठन्ति, तद् वै नगरम् नाम (अभिधीयते) ॥

Oh King, where the wise men, well versed in Vedas, full of good character, knowledgeable and ascetic stay, that place indeed is called a city.

नृप-सं. वि. ए. व. -King, यत्र-अव्यय- where, in which place, वेदाढ्याः, वृत्तसंपन्नाः, ज्ञानवन्तः , तपस्विनः , विप्राः -all-पु. लिं. प्र. वि. ब. व. of वेदाढ्य-वेद- holy scriptures, Vedas-आढ्य-adjctv-rich, abundanting in - वेदेषु आढ्यः -स. तत्पुरुष स., वृत्तसंपन्न-full of character- वृत्त - character, behaviour- संपन्न- rich, full of - क. भू. धा. वि. of सं+पद्- (पद्-पद्यते- ४ ग. आ. प. to go, to move)-वृत्तेण संपन्नः - तृ. तत्पुरुष स., ज्ञानवान्- knowledgeable, तपस्विन्-ascetic, one who does penance, विप्र- man with wisdom, a bramhan, तिष्ठन्ति- वर्त. तृ. पु. ब. व. of स्था-१ ग. प. प.-तिष्ठति-stay, stand, तद् -that, वै -अव्यय- a particle of affirmation or certainly-indeed, surely,

नगरम्- न. लिं. प्र. वि. ए. व. of-नगर-city, town, नाम-अव्यय- a particle used as 'named', 'called', 'indeed'

शरदि न वर्षति गर्जति, वर्षति वर्षासु निःस्वनो मेघः।
नीचो वदति न कुरुते, न वदति सुजनः करोत्येव ॥७८॥ - सुभाषित रत्न भाण्डार

शरदि मेघः (केवलम्) गर्जति, न वर्षति । वर्षासु निःस्वनः (मेघः) वर्षति (एव, न गर्जति)। नीचः (केवलम्) वदति, न कुरुते। सुजनः (युक्तं कार्यं) करोति एव, न वदति ॥

Cloud in autumn season makes noise (only) (but) does not give rain. Cloud of rainy season just rains and does not make any noise. A mean person just talks, does not do any work, whereas a noble person does not talk, just acts (on noble causes).

शरदि- स्त्री. लिं. स. वि. ए. व. of शरद्- autumn, autumnal season & वर्षासु-स्त्री. लिं. स. वि. ब. व. of वर्षा-rainy season, मेघः, निःस्वनः, नीचः, सुजनः- all पु. लिं. प्र. वि. ए. व. of मेघ- cloud, निःस्वन-quiet, silent- निस् -अव्यय-as a prefix means-not, without, away from, स्वन-sound- धा. सा. नाम of स्व-स्वनति-१ ग. प. प. to sound, make noise, नीच- mean, low, worthless, सुजन or साधु-noble, gentleman, न-no, not, वर्षति, गर्जति, वदति, करोति & कुरुते - all वर्त. तृ. पु. ए. व. of वृष्-१ ग. प. प. to rain, pour down, गर्ज् - १ ग. प. प. & १० ग. उ. प.-गर्जयति-ते- to roar, to thunder, वद्-१ ग. प. प. to say, talk & कृ-करोति -कुरुते-८ ग. उ. प. to do, to make, एव-अव्यय-just, only, mere

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम्।
असद्भिः शपथेनोक्तं जले लिखितमक्षरम् ॥७९॥ - सुभाषित रत्न भाण्डार

सद्भिः तु लीलया प्रोक्तम् अक्षरम्, शिला-लिखितम् (इव अस्ति) । असद्भिः शपथेन उक्तम् अक्षरम् जले लिखितम् इव (भवति) ॥

Word spoken routinely by the noble persons is carved in stone, while the words spoken by the cheats, even under oath, is written in water.

सद्भिः असद्भिः- both पु. लिं. तृ. वि. ब. व. of सत् -noble, gentleman, truthful & असत्-mean, untruthful, cheat- न सत् -नञ्तत्पुरुष स., तु -अव्यय- on the contrary, instead, where as, लीलया & शपथेन तृ. वि. ए. व. of लीला-स्त्री. लिं.-Amusement, easily, child's play, in jest & शपथ-an oath, swearing. प्रोक्तम् & उक्तम्, लिखितम् अक्षरम् - all न. लिं. प्र. वि. ए. व. of प्रोक्त & उक्त - said, spoken-क. भू. धा वि. of प्र+वच् & वच्- वक्ति २ ग. प. प. to say, speak, लिखित- written-

क. भू. धा वि. of लिख्- लिखति ६ ग. प. प. to write, inscribe, अक्षर-letter, alphabet, शिला-स्त्री. लिं.- stone शिलायाम् लिखितम्- शिलालिखितम्- स. तत्पुरुष स., जले-न. लिं. स. वि. ए. व. of जल-water.

सहते शरशतघातानश्वः सहते कदापि नैव कशाम्।
सहतेविपत्सहस्रं मानी नैवापमानलेशमपि ॥८०॥

अश्वः शर-शत-घातान् सहते। न कदा-अपि एव कशाम् सहते। मानी विपत् -सहस्रम् सहते। अपमान -लेशम् न एव अपि (सहते) ॥

A horse tolerates a hundred arrow-hits, but will not tolerate a whip strike. A proud person will face thousands of hardships, but will never tolerate even a small insult.

अश्वः & मानी -पु. लिं. प्र. वि. ए. व. of अश्व-horse & मानिन्-proud person, respectable person, शर-arrow, शत-hundred, घातान्-पु. लिं. द्वि. वि. ब. व. of -घात- striking, hit - क. भू. धा. वि. of प्रयोजक of हन्-घातयति-ते-(हन्-हन्ति २ ग. प. प. to kill, hurt, strike)-शराणि शतम्-शरशतम्-वि.उ.प.कर्मधारय स. शरशताणाम् घातः-शरशतघातः-ष. तत्पुरुष स., सहते-वर्त. तृ. पु. ए. व. of सह्-१ ग. आ. प. to tolerate, bear, न-no, not, कदा- अव्यय-when, at what time, अपि-अव्यय-also, and, न कदापि-never, एव-अव्यय- just, just so, कशाम् -स्त्री. लिं. द्वि. वि. ए. व. of कशा-whip, विपत् -स्त्री. लिं.-trouble, distress, calamity, सहस्रम्- thousand- विपदाम् सहस्रम्- विपत्सहस्रम्-वि.उ.प.कर्मधारय स., अपमान-insult, dishonour लेशम् -द्वि. वि. ए. व. of लेश- bit, a portion-अपमानस्य लेशः- आपमानलेशः -उपपद तत्पुरुष स.

स्वभावं न जहात्येव साधुरापद्गतोऽपि सन् ।
कर्पूरः पावकस्पृष्टः सौरभं लभतेतराम् ॥ ८१ ॥ - दृष्टान्तकलिकाशतकम् ३७

साधुः आपद्गतः अपि सन्, स्वभावम् न एव जहाति। कर्पूरः पावकस्पृष्टः सौरभम् लभतेतराम् ॥

A noble person does not shed his inherent good qualities even when faced with calamity, just like a camphor, contacted by fire, emits better fragrance.

साधुः, आपद्गतः, कर्पूरः, पावकस्पृष्टः-all प्र. वि. ए. व. of साधु- noble person, gentleman, आपद्गत-facing calamity-आपद्- calamity & गतः- gone, facing-क. भू. धा. वि. of गम्- गच्छति १ ग. प. प. to go, (आपदि गतः - सप्तमि तत्पुरुष स), कर्पूर-camphor, पावकस्पृष्टः- पावकेन स्पृष्टः - तृ. तत्पु. स. coming into contact with fire- पावकः-fire- स्पृष्टः - touched- क. भू. धा. वि. of स्पृश्-स्पृशति ६ ग. प. प. to touch, to lay hand on, stroke gently, अपि-अव्यय-also, even, and, सन्-being -

वर्त. का. वा. धा. सा. वि. of अस्-अस्ति.२ ग. प. प. to be, exist, स्वभाव- characteristics, nature, quality, न-no, not, एव-अव्यय-just, just so, जहाति- वर्त. तृ. पु. ए. व. of हा-२ ग. प. प. to leave, abandon, सौरभम् -द्वि. वि. ए. व. of सौरभ -fragrance, लभते-वर्त. तृ. पु. ए. व. of लभ्-१ ग. आ. प. to get, acquire, तराम्- द्वि. वि. ए. व. of तरा-suffix to a verb which intensifies its meaning

साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम्।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया॥८२॥ -हितोपदेशः

प्रकोपितस्य अपि साधोः मनः विक्रियाम् न याति। तृणोल्कया सागराम्भः तापयितुम् न हि शक्यम् (भवति) ॥

Even when instigated (by others), the mind of noble person does not get disturbed. It is not possible to heat the water of ocean by a torch of dried grass.

प्रकोपितस्य & साधोः - both ष. वि. ए. व. of प्रकोपित- instigated, made to get angry-क. भू. धा. वि. of प्र+कुप्- प्रयोजक -कोपयति-ते- to make angry- कुप-कुप्यति ४ ग. प. प. to get angry & साधु- noble person, gentleman अपि-अव्यय- even, also, and, मनः -न. लिं. प्र. वि. ए. व. of मनस्- mind, heart, विक्रियाम्- स्त्री. लिं. द्वि. वि. ए. व. of विक्रिया- change, agitation, anger, disturbance, न-no, not, याति- वर्त. तृ. पु. ए. व. of या-२ ग. प. प. to go, to come to, become, तृणोल्कया-स्त्री. लिं. तृ. वि. ए. व. of तृणोल्का- torch of dried grass- तृणम्- grass-उल्का- torch, flame, a meteor--ष. तत्पुरुष स, सागराम्भः -sea water-न्. लिं. द्वि. वि. ए. व. of -सागराम्भस्- सागरः-sea, ocean- अम्भः (अम्भस्)-water-न. लिं.- सागरस्य अम्भः -ष. तत्पुरुष स., तापयितुम् - तुमन्त हेत्वर्थक धा. सा. अव्यय of प्रयोजक -तापयति-ते- to heat, to warm-तप्-तपति १ ग. प. प.-to be hot, हि -अव्यय- indeed, surely, शक्यम्-न. लिं. प्र. वि. ए. व. of शक्य-(शक्तव्य,शक्तनीय)- possible, capable-कर्मणि वि. धा. सा. वि. of शक्-शक्नोति ५ ग. प. प. to be able, to have power

सुखस्य मण्डः परिपीयते तैः
जीवन्ति ते सत्पुरुषाः त एव।
हृष्टाः सुहृष्टैः सुहृदः सुहृद्भिः
प्रियाः प्रियैः ये सहिता रमन्ते ॥ ८३ ॥

ये सुहृष्टैः हृष्टाः, सुहृद्भिः सुहृदः, प्रियैः प्रियाः (सन्ति), तैः सहिताः रमन्ते, ते सुखस्य मण्डः परिपीयते (च) ते सत्पुरुषाः एव जीवन्ति (च) ॥

Those who are happy among joyful people, who are very friendly with their friends, who love their beloved ones and enjoy life along with (all of) them; they (alone) taste the cream (essence) of happiness. (And) these great people alone live the Life truly !

सुहृष्टैः, सुहृद्भिः, प्रियैः & तैः - all पु. लिं. तृ. वि. ब. व. of सुहृष्ट-very happy-सु-अव्यय- prefixed to indicate- well, good, very- हृष्ट-happy-क. भू. धा. वि. of हृष् -हर्षति १ ग. प. प. & हृष्यति ४ ग. प. प. to be happy, glad, rejoice, सुहृद्- a friend, one having a kind heart, प्रिय- beloved, agreeable & तद्-he, ये, ते, हृष्टाः, सुहृदः, प्रियाः, सत्पुरुषाः & सहिताः - all पु. लिं. प्र. वि. ब. व. of यद्-who, तद् - he, हृष्ट, सुहृद्, प्रिय, सत्पुरुष (noble person, great man- सत्-noble, good+ पुरुषः-person) & सहित-adjctv- together, along with, रमन्ते & जीवन्ति -वर्त. तृ. पु. ब. व. of रम्-रमते- १ ग. आ. प. to enjoy, delight & जीव्-१ ग. प. प. जीवति to live, subsist, सुखस्य-न. लिं. ष. वि. ए. व. of सुख- happiness, मण्डः - essence, cream, परिपीयते- get to drink fully-कर्मणि प्रयोग तृ. पु. ए. व. of परि+पा-(पा-पिबति १ ग. प. प. to drink), एव-अव्यय-alone, just, just so

अधर्षितानां शूराणां समरेष्वनिवर्तिनाम्।
धर्षणामर्षणं भीरु मरणादतिरिच्यते ॥ ८४ ॥-रामा. -कि. काण्ड, स,१६, श्लो. ३
(Said by Vali to Tara when she pleads with him not to accept challenge for combat by Sugreeva)

भीरु, अधर्षितानाम्, शूराणाम्, समरेषु अनिवर्तिनाम्, धर्षणामर्षणम् मरणात् अतिरिच्यते।

Oh, coward woman, for the undefeated, brave and those who do not run away from the battle, tolerating the humiliation is much more painful than the death itself.

भीरु-सं. वि. ए. व.- Coward, timid lady, अधर्षितानाम्, शूराणाम्, अनिवर्तिनाम् all- ष. वि. ब. व. of अधर्षित- undefeated, unconquered, न धर्षित-नञ्तत्पुरुष स.-धर्षित-क. भू. धा. वि. of धृष्-धर्षति १. ग. प. प. & धर्षयति-ते १० ग. उ. प. to conquer, destroy, insult शूर-brave, अनिवर्तिन्-unreturned, not backed out, न निवर्तिन्-नञ्तत्पुरुष स., निवर्तिन्- returning person समरेषु- न. लिं. स. वि. ब. व. of समर-war, battle, धर्षणामर्षणम्- tolerating the insult (humiliation)-धर्षण-insult, humiliation-(धा. सा. नाम of धृष्-धर्षति १. ग. प. प. & धर्षयति-ते & मर्षण- tolerance-(धा. सा. नाम of मृष्-मर्षति-ते १. ग. उ. प. & मर्षयति-ते १० ग. उ. प. to bear, endure-धर्षणस्य मर्षणम्-ष. तत्पुरुष स, मरणात्-पं. वि. ए. व. of मरण-death, अतिरिच्यते-gets surpassed, gets far exceeding-कर्मणि प्रयोग of अति+रिच् - (रिच्-रिणक्ति-रिंक्ते ७ ग. उ. प. to empty, evacuate, clear

अम्भोजिनीवनविलासनिवासमेव हंसस्य हन्ति नितरां कुपितो विधाता।
नत्वस्य दुग्धजलभेदविधौ प्रसिद्धा वैदग्ध्यकीर्तिमपहर्तुमसौ समर्थः ॥ ८५ ॥
-भतृहरि- नी. श.

कुपितः विधाता हंसस्य अम्भोजिनी-वन-विलास-निवासम् एव हन्ति। (परन्तु स:) अस्य दुग्ध-जल-भेद-विधौ प्रसिद्धाम् वैदग्ध्य-कीर्तिम् अपहर्तुम् असौ नितराम् समर्थः न तु (अस्ति) ॥

Destiny (Creator), when angry, can certainly destroy the pleasure of lotus forest abode of a swan. However, he is surely not capable of taking away its well-known and famous skill to separate milk from mixture of milk and water.

कुपितः, विधाता, असौ & समर्थः- all पु. लिं. प्र. वि. ए. व. of कुपित-angry - क. भू. धा. वि. of कुप्-कुप्यति ४ ग. प. प. to get angry, विधातृ- destiny, creator, अदस्-he & समर्थ-adjctv- capable, strong, qualified, हंसस्य & अस्य -पु. लिं. ष. वि. ए. व. of हंस-swan, flamingo & इदम् -he, अम्भस्-water-अम्भोजम्-lotus- अम्भोजिनी- lotus plant or flower. वन-forest-अम्भोजिन्याः वनम्-अम्भोजिनीवनम् -ष. तत्पुरुष स., विलास- pleasure -अम्भोजिनीवनस्य विलासः -अम्भोजिनीवनविलासः & अम्भोजिनीवनविलासस्य निवासम्- अम्भोजिनीवनविलासनिवासम्- both ष. तत्पुरुष स., एव-अव्यय-just, just so, only, हन्ति- वर्त. तृ. पु. ए. व. of हन्-२ ग प. प. to kill, destroy, न- no, not, तु- अव्यय- indeed, surely, दुग्ध-milk, जल-water, दुग्धम् च जलम् च -दुग्धजलम् -द्वंद्व स., भेद- splitting, breaking, दुग्धजलयोः भेदम्- दुग्धजलभेदम्- ष. तत्पुरुष स., विधौ-पु. लि. स. वि. ए. व. of विधि -practice, means, precept, दुग्धजलभेदस्य विधिः-दुग्धजलभेदविधिः -ष. तत्पुरुष स., प्रसिद्धाम् & कीर्तिम्- स्त्री. लिं. द्वि. वि. ए. व. of प्रसिद्धा-famous, well-known & कीर्ति-fame, वैदग्ध्य-(वैदग्धम्, वैदग्धी)- skill, proficiency-वैदग्ध्यम् कीर्तिम् -वैदग्ध्यकीर्तिम् - कर्मधारय स., अपहर्तुम् - हेत्वर्थक तुमन्त धा. सा. अव्यय of अप+हृ-to take away, steal -(हृ-हरति १ ग. प. प. to take, carry) नितराम्-अव्यय- certainly, entirely, wholely, very much

एक एव खगो मानी वने वसति चातकः।
पिपासितो हि म्रियते याचते वा पुरन्दरम् ॥ ८६ ॥

चातकः एकः एव मानी खगः वने वसति। (सः) पिपासितः हि म्रियते वा पुरन्दरम् याचते ॥

Chatak is the only proud bird that lives in the forest. It dies either due to thirst or begs only to Indra (God of Rains for water).

This Subhashit is a अन्योक्ति (allegory). The underlying idea is that the great and noble men remain firm on their ideals and duties and do not hesitate even to die to achieve those objectives.

चातकः, एकः, मानी, खगः, पिपासितः - all पु. लिं. प्र. वि. ए. व. of चातक- a bird, which is supposed to live only on rain water, एक-only, sole, single, मानिन्- proud, possessed of self respect, खग- bird- खम्-sky- खे गच्छति इति-खगः -उपपद तत्पुरुष स., पिपासित-thirsty- (क. भू. धा. वि. of desiderative of पा- पिपासति- to wish to drink- पा- पिबति १ ग. प. प. to drink), एव-अव्यय-just, only, वने- स. वि. ए. व. of वन-forest, वसति & याचते-वर्त. तृ. पु. ए. व. of वस्-१ ग. प. प. to live, stay & याच्-१ ग. आ. प. to beg, ask, हि-अव्यय-surely, indeed, just, म्रियते-gets ready to die- प्रयोजक वर्त. तृ. पु. ए. व. of मृ -मरति-ते १ ग. प. प. to die, वा-अव्यय-or, and, instead, पुरन्दरम्-पु. लिं. द्वि. वि. ए. व. of पुरन्दर- epithet of Lord Indra

कदर्थितस्यापि हि धैर्यवृत्तेः
न शक्यते धैर्यगुणः प्रमार्ष्टुम् ।
अधोमुखस्यापि कृतस्य वह्नेः
नाधः शिखा यान्ति कदाचिदेव ॥८७॥ भर्तृहरिशतकत्रयी-२७

धैर्य-वृत्तेः, कदर्थितस्य अपि, धैर्य-गुणः प्रमार्ष्टुं न शक्यते। वह्नेः, अधोमुखस्य कृतस्य अपि, शिखाः कदाचित् एव अधः न यान्ति ।

Courage of a strong person cannot be suppressed, even if he is despised. The flames of a fire, even if held down, do not ever grow downwards.

धैर्यवृत्तेः, वह्नेः, कदर्थितस्य, कृतस्य & अधोमुखस्य -all पु. लिं. ष. वि. ए. व. of धैर्यवृत्ति- a brave person, a strong man- धैर्यम्- Firmness, Strength वृत्तिः - स्त्री. Attitude, State, Condition धैर्यम् यस्य वृत्तिः अस्ति सः - बहुव्रीहि स. वह्नि- fire, कदर्थित- कद्+अर्थित- despised, disdained- (कद्-अव्यय-a particle substituted for कु- to express badness, uselessness & अर्थित-desired, wished- क. भू. धा. वि. of अर्थ्-अर्थयते- १० ग. आ. प. to request, ask), कृत-done- क. भू. धा. वि. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make & अधोमुख- down faced, turned down wards- अधः-अधस्- अव्यय- down, below, मुख- face- यस्य मुखः अधः अस्ति सः - बहुव्रीहि स., अपि-अव्यय-also, even, धैर्यगुणः-पु. लिं. प्र. वि. ए. व. -धैर्यः गुणः - कर्मधारय स.- धैर्यः-Bravery, strength, fortitude & गुणः - quality, nature, प्रमार्ष्टुम् -to suppress, strike- पू. का. वा. तुमन्त धा. सा. अव्यय of प्र+मृज्- (मृज्-मार्ष्टि २ ग. प. प. & मार्जयति-ते १० ग. उ. प. to wash or wipe off), शक्यते-कर्मणि प्रयोग तृ. पु. ए. व. of शक्-शक्नोति ५ ग. प. प. to be able, to be competent, शिखाः -स्त्री. लिं. प्र. वि. ब. व. of शिखा-top, crest sharp end, न कदाचित्-never, seldom- कदाचित्-(कदा+चित्)- at one time, at some time or other- कदा-अव्यय-when, at what time- चित् - thought, perception; एव-अव्यय- just, just so, only, यान्ति-वर्त. तृ. पु. ब. व. २ ग. प. प. of या-याति - to go, to come to

किं कुलेन विशालेन शीलमेवात्र कारणम् ।
कृमयः किं न जायन्ते कुसुमेषु सुगन्धिषु ॥ ८८ ॥

विशालेन कुलेन किम् (प्रयोजनम् अस्ति) ? शीलम् एव अत्र कारणम् (भवति)।
किम् सुगन्धिषु कुसुमेषु कृमयः न जायन्ते ?

What is the use of (birth in) a great family? Only character is of utmost value. Are not insects found in fragrant flowers?

विशालेन & कुलेन - न. लिं. तृ. वि. ए. व. of विशाल-great, broad, large & कुल- family, race, किम् - what, which (interrogative), शीलम् & कारणम् -न. लिं. प्र. वि. ए. व. of शील- character, nature, conduct & कारण- object, ground, basis, एव-अव्यय-only, just, just so, अत्र- अव्यय- here, in this place, सुगन्धिषु & कुसुमेषु- न. लिं. स. वि. ब. व. of सुगन्ध- fragrance & कुसुम- flower कृमयः- पु. लिं. प्र. वि. ब. व. of कृमिः; जायन्ते-वर्त. तृ. पु. ब. व. of जन्-जायते ४ ग. आ. प. to be born, take birth, happen

ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो
ज्ञानस्योपशमः श्रुतस्य विनयो वित्तस्य पात्रे व्ययः।
अक्रोधस्तपसः क्षमा बलवतां धर्मस्य निर्व्याजता
सर्वेषामपि सर्वकारणमिदं शीलं परं भूषणम् ॥८९॥-भतृहरि नी. श.

सुजनता ऐश्वर्यस्य विभूषणम् (अस्ति)। वाक्संयमः शौर्यस्य (विभूषणम् अस्ति)। ज्ञानस्य उपशमः (विभूषणम् अस्ति)। श्रुतस्य विनयः (विभूषणम् अस्ति)। वित्तस्य पात्रे व्ययः (विभूषणम् अस्ति)। तपसः अक्रोधः (विभूषणम् अस्ति)। क्षमा बलवताम् (विभूषणम् अस्ति)। निर्व्याजता धर्मस्य (विभूषणम् अस्ति)। सर्वेषाम् अपि सर्वकारणम् इदम् शीलम् परम् भूषणम् (अस्ति) ॥

Kindness is the decoration of wealth and control of speech is the decoration of bravery. Calmness (patience) is the decoration of knowledge and politeness is the decoration of a learned person. It is worthy to spend money for a deserving cause. Not getting angry is decoration of penance and forgiveness is decoration of strong-men. Honesty (uprightness) is decoration of the right code of conduct. For all of them, an excellent character, in all respects, is indeed the highest decoration.

सुजनता- benevolence, kindness, क्षमा- forgiveness, patience, निर्व्याजता- honesty, uprightness (निर्+व्याजता- व्याजः- deceit, fraud)-all स्त्री. लिं. प्र. वि. ए. व., विभूषणम् & भूषणम्- decoration, ornament-both in न. लिं. प्र. वि. ए. व., ऐश्वर्यस्य, शौर्यस्य, ज्ञानस्य, श्रुतस्य, वित्तस्य, तपसः, धर्मस्य & प्रभवितुः all in पु. लिं. ष. वि. ए. व. of ऐश्वर्य- wealth, शौर्य-bravery, ज्ञान- knowledge, श्रुत- learning of sacred texts, one having scientific knowledge, कुल- family,

race, वित्त- money, wealth, तपस्- austerity, penance, धर्म-code of conduct, religion, प्रभवितृ- ruler, master, वाक्संयमः -control of speech -वाच्-स्त्री. लिं.-talk, speech, संयमः- control वाचः संयमः -षष्ठी तत्पुरुष स., उपशमः- calmness (patience), विनयः- politeness, व्ययः-spending, क्रोधः -anger-न क्रोधः- अक्रोधः -no anger- नञ्तत्पुरुष स- all in- पु. लिं. प्र. वि. ए. व., बलवताम् - for brave & सर्वेषाम्- for all- both in पु. लिं. ष. वि. ब. व. of बलवान् & सर्व- pronominal adjctv- all, entire, अपि-अव्यय-also, even, just, just so, सर्वकारणम् -all reason, basis- (सर्वम् कारणम्- कर्मधारय तत्पुरुष स.), इदम्- this, शीलम्-good conduct, परम्- ultimate, highest-all in न. लिं. प्र. वि. ए. व.,

गुणाः अनुक्ताः अपि ते स्वयं यान्ति प्रकाशताम्।
छाद्यमानाऽपि सौगन्धमुद्वमत्येव मालती।।९०।।

ते गुणाः, अनुक्ताः अपि, स्वयं प्रकाशताम् यान्ति। मालती छाद्यमाना अपि, सौगन्धम् एव उद्वमति ॥

(Good) Qualities, even if unspoken, become known on their own. Jasmine flower, even hidden, keeps giving out fragrance only.

अनुक्ताः, गुणाः & ते -पु. लिं. प्र. वि. ब. व. of अनुक्त- unspoken उक्त-क. भू. धा. वि. of वच्-वक्ति २ ग. प. प. to speak, say- न उक्त -अनुक्त- नञ्तत्पुरुष स., गुण- Quality or inherent property & तद्-he, अपि-अव्यय-also, even, and, स्वयम्-अव्यय- oneself, one's own person, प्रकाशताम्स्त्री. लिं. द्वि. वि. ए. व. of प्रकाशता- bringing to light, manifest, making known, यान्ति- वर्त. तृ. पु. ब. व. of या-याति २ ग. प. प. to go, to come to, मालती- a kind of jasmine flower & छाद्यमाना- hidden, covered- both in- स्त्री. लिं. प्र. वि. ए. व.-छाद्यमान- वर्त. का वा. धा. सा. वि. of छद्-छदति-ते १ ग. उ. प. & छादयति-ते १० ग. उ. प. - to hide, cover, सौगन्धम् -न. लिं. द्वि. वि. ए. व. of सौगन्ध-adjctv-fragrance, sweet smell, एव-अव्यय-only, just, just so, उद्वमति- वर्त. तृ. पु. ए. व. of उत्+वम्- to give out, emit- वम्-वमति १ ग. प. प. to vomit, spit out उत् - अव्यय -expressing doubt, intensity, deliberation

जन्मस्थानं न खलु विमलं वर्णनीयो न वर्णो दूरे पुंसां वपुषि रचना पंकशंकां करोति ।
यद्यप्येवं सकलसुरभिद्रव्यगर्वापहारी को जानीते परिमलगुणः कोऽपि कस्तूरिकायाः॥९१ ॥

कस्तूरिकायाः जन्मस्थानम् न खलु विमलम् (अस्ति)। (तस्याः) वर्णः न वर्णनीयः (अस्ति)। दूरे, पुंसाम् (तस्याः) वपुषि रचना पंकशंकां करोति। यदि अपि एवम् (अस्ति), कः अपि (तस्याः) सकल-सुरभि-द्रव्य-गर्व-अपहारी परिमलगुणः कः जानीते ?

The birthplace of a muskdeer is not clean and her complexion is not praiseworthy. From a distance, men wonder whether her body structure is made of mud! Even with all these (limitations), who can understand her sweet smell that can defeat the pride of all fragrant materials?

कस्तूरिकायाः -स्त्री. लि. ष. वि. ए. व. of कस्तूरिका-musk, जन्मस्थानम्- birth place- जन्मस्य स्थानम्- ष. तत्पुरुष स. & विमल- clean, pure, spotless-both न. लिं. प्र. वि. ए. व., न- no, not, खलु- अव्यय- indeed, surely, वर्णः - colour, complexion, वर्णनीयः - praiseworthy, illuminative-(also वर्णितव्य, वर्ण्य -कर्मणि वि. धा. सा. वि. of वर्ण्-वर्णयति-ते १० ग. उ. प. to praise, extol, describe, to colour) & कः (किम्)- who -all in पु. लिं. प्र. वि. ए. व., दूरे- at distance- स. वि. ए. व. of -दूर-distance, पुंसाम् -पु. लिं. ष. वि. ब. व. of पुंस्-(पुमान् पुमांसौ पुमांसः)- a man, human, वपुषि- न. लिं. स. वि. ए. व. of वपुस्- body, form, रचना- application, arrangement, पंकशंकाम्-स्त्री. लि. द्वि. वि. ए. व. of पंकशंका- suspecting mud-पंकः-पंकम्- mud, mire- शंका- doubt, fear, suspicion-पंकस्य शंका- ष. तत्पुरुष स., करोति & जानीते-वर्त. तृ. पु. ए. व. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make & ज्ञा-जानाति-जानीते ९ ग. उ. प. to know, be aware, यद्यप्येवम्- even if it is so- यदि +अपि+ एवम्-all अव्यय- यदि-if, in case, अपि-even एवम्-thus, like this, सकल-adjctv-entire, all, whole, सुरभि-adjctv- sweet smelling, fragrance, द्रव्य-wealth, property, fit or suitable object, गर्व-pride, अपहारी-प्र. वि. ए. व. of अपहारिन्- stealer, thief- सुरभियुक्ताणि द्रव्याणि -सुरभिद्रव्याणि- सकलानि सुरभिद्रव्याणि- सकलसुरभिद्रव्याणि- both कर्मधारय स. -सकलसुरभिद्रव्याणाम् गर्वम्-सकलसुरभिद्रव्यगर्वम्- ष. तत्पुरुष स.-सकलसुरभिद्रव्यगर्वम् अपहरति इति- सकलसुरभिद्रव्यगर्वापहारी- उपपद तत्पुरुष स., परिमलगुणः- fragrant property-परिमलः -fragrance -गुणः property, quality- परिमलस्य गुणः- ष तत्पुरुष स.

त्यागो गुणो गुणशताभ्यधिको मतो मे,
विद्यापि भूषयति तं यदि किं ब्रवीमि ।
शौर्यं च नाम यदि तत्र नमोऽस्तु तस्मै
तच्च त्रयं न च यदीर्ष्यति चित्रमेतत् ॥९२॥ - सुभाषितरत्नभाण्डागारम्

त्यागः गुणः गुणशताभ्यधिकः (इति) मे मतः। यदि तम् विद्या अपि भूषयति (तदा अहम्) किम् ब्रवीमि। तत्र शौर्यम् च नाम अस्तु तस्मै नमः। तद् त्रयम् (यस्य अस्ति तथापि सः) न च यद् ईर्ष्यति एतत् चित्रम् (भवति) ॥

My opinion is that a sacrificing nature is better than hundreds of other virtues. If that person is (also very) knowledgeable, then what (else) I can say about him ! In addition, If

he is also brave, I bow to him! Having these three attributes, if he is not jealous (of others), then it is surprising (indeed)!

त्यागः- sacrifice, गुणः- quality, nature, गुणशताभ्यधिकः better than hundred other qualities- गुण-quality, शत- hundred अभ्यधिकः-adjctv-surpassing, more than- गुणम् शतम्- गुणशतम्- वि.उ.प.कर्मधारय स.   गुणशतेषु अभ्यधिकः- गुणशताभ्यधिकः -स. तत्पुरुष स., मतः - opinion, view- all in-पु. लिं. प्र. वि. ए. व., मे (मम)- ष. वि. ए. व. of अस्मद्- I, यदि-अव्यय- if, in case, तम्- him -पु. लिं. द्वि. वि. ए. व. of तद्-he, विद्या- knowledge, education-स्त्री. लिं. प्र. वि. ए. व., अपि - अव्यय- also, and, even, भूषयति- वर्त. तृ. पु. ए. व. of भूष्-१० ग. उ. प. to adorn, decorate, किम्- what, ब्रवीमि-वर्त. प्र. पु. ए. व. of ब्रू- ब्रवीति-ब्रूते २ ग. उ. प. to say, speak, तत्र-अव्यय- there, in that place, शौर्यम्- bravery, strength, च-and, नाम-अव्यय- named, called, indeed, truly, अस्तु- आज्ञार्थ तृ. पु. ए. व. of अस्-अस्ति २ ग. प. प. to be, to exist, तस्मै- to him -पु. लिं. च. वि. ए. व. of तद्-he, नमः (नमस्)-अव्यय- a bow, salutation, obeisance, तद् - that, त्रयम्-a group of three, न-no, not, यद्- which, who, ईर्ष्यति-वर्त. तृ. पु. ए. व. of ईर्ष्य्- १ प.प. to be jealous, to envy, एतत्- that, चित्रम्- strange, surprising

दानेन तुल्यो विधिरास्ति नान्यो
लोभाच्च नान्योस्ति रिपुः पृथिव्याम्।
विभूषणं शीलसमं च नान्यत्
संतोषतुल्यं धनमस्ति नान्यत् ॥ ९३ ॥

दानेन तुल्यः अन्यः विधिः न अस्ति। लोभात् अन्यः रिपुः पृथिव्याम् च न अस्ति। शील-समम् विभूषणम् अन्यत् च न (अस्ति)। संतोष-तुल्यम् धनम् न अन्यत् अस्ति ॥

There is no ritual comparable to philanthropy. In this world, there is no enemy other than greed. There is no decoration other than good character. There is no wealth comparable to happiness.

दानेन- तृ. वि. ए. व. of दान-donation, giving, philanthropy, तुल्यः - comparable, equal to (also तोलितव्य & तोलनीय)-कर्मणि वि. धा. सा. वि. of तुल्-तोलति १ ग. प. प. & तोलयति-ते १० ग. उ. प. to weigh, measure, compare, अन्यः -adjctv- other, another, विधिः- ritual, a sacred percept or rule. रिपुः- enemy - all in पु. लिं. प्र. वि. ए. व., न- no, not, अस्ति- वर्त. तृ. पु. ए. व. of अस्- २ ग. प. प. to be, exist, लोभात्- पं. वि. ए. व. of लोभ-greed, desire पृथिव्याम् - स्त्री. लिं. स. वि. ए. व. of पृथिवी- world, earth. च- and, शील- character, conduct, सम-adjctv-equal, like, similar- शीलस्य समम्- शीलसमम्- षष्ठी तत्पुरुष स., विभूषणम्- decoration, ornament, संतोष-happiness,

joy- संतोषणात् तुल्यम् -संतोषतुल्यम् -comparable to happiness- पञ्चमी तत्पुरुष स., धनम् - wealth, money,

न हि संचयवान् कश्चित् दृश्यते निरुपद्रवः।
अतश्च धर्मिभिर्पुंभिरनीहार्थः प्रशस्यते।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ ९४ ॥-महाभा. वन. अ ३

(Told by Shounaka to Yudhistir in his vanavasa)
न कश्चित् संचयवान् निरुपद्रवः हि दृश्यते। अतः च धर्मिभिः पुंभिः अनीहार्थः प्रशस्यते। पङ्कस्य प्रक्षालनाद्, दूराद् अस्पर्शनम् हि वरम् (अस्ति) ॥

No hoarder (of wealth) is found to be free of trouble. Therefore, people who follow Dharma praise detachment (to wealth). (Think of it this way) Rather than washing off the dirt, it is better not to touch it even from a distance!

न- no, not, कश्चित्-कः+चित्-who ever, some, न कश्चित्- no one, none, संचयवान् , निरुपद्रवः & अनीहार्थः - पु. लिं. प्र. वि. ए. व. of संचयवत्- hoarder; संचय-collection, hoarding-वत्-adjctv-afix to noun to show 'possession', निरुपद्रव- free of trouble- उपद्रव- trouble, harm, distress- निर्-अव्यय- conveying sense of 'out of', 'away from', 'without', & अनीहार्थ- preference to indifference, ईहा-desire, wish, अन् ईहा-नञ्तत्पुरुष स. अनीहा-indifference-अनीह-adjctv-listless, indifferent, अनीहायै अर्थः -अनीहार्थः - च. तत्पुरुष स., हि-अव्यय-indeed, surely, दृश्यते & प्रशस्यते -कर्मणि प्रयोग तृ. पु. ए. व. of दृश्-पश्यति १ ग. प. प. to see, observe & प्र+शंस्- to extol, praise -शंस्-शंसति १ ग. प. प. to praise, अतः (अतस्)-अव्यय- therefore, च-and, धर्मिभिः & पुंभिः पु. लिं. तृ. वि. ब. व. of धर्मिन्- follower of good codes of conduct (Dharma) & पुंस्- man, male, human, पङ्कस्य-ष. वि. ए. व. of पङ्क-mud, dirt, दूरात् & प्रक्षालनाद्- पं. वि. ए. व. of दूर-distance, far & प्रक्षालन- washing, cleaning- धा. सा. नाम of प्र+क्षल्-क्षालयति-ते १० ग. उ. प. to wash, cleanse, अस्पर्शनम्- not touching-न स्पर्शनम्- नञ्तत्पुरुष स.-धा. सा. नाम of -स्पृश्-स्पृशति ६ ग. प. प. to touch, वरम्-अव्यय- better than, preferred

परैः प्रोक्ता गुणा यस्य निर्गुणोऽपि गुणी भवेत् ।
इन्द्रोऽपि लघुतां याति स्वयं प्रख्यापितैर्गुणैः॥९५॥

यस्य गुणाः परैः प्रोक्ताः (सन्ति, सः), निर्गुणः अपि गुणी भवेत्। (परन्तु), इन्द्रः अपि, स्वयं प्रख्यापितैः गुणैः, लघुतां याति।

Anyone, whose virtues are told by others, even a worthless person also gets endowed with merits. However, with self proclaimed virtues, even Indra gets disrespect.

यस्य-whose- पु. लिं. ष. वि. ए. व. of यद्- who, गुणाः & प्रोक्ताः -पु. लिं. प्र. वि. ब. व. of गुण-virtue, quality & प्रोक्त-said, told, mentioned -क. भू. धा. वि. Of प्र+वच्-to say, tell- वच्-वक्ति २ ग. प. प. to say, tell, परैः, प्रख्यापितैः & गुणैः -पु. लिं. तृ. वि. ब. व. of पर-other, another, प्रख्यापित- proclaimed-- प्रयोजक क. भू. धा. वि. Of प्र+ख्या-ख्यापयति-ते -proclaimed- ख्या-ख्याति -२. ग. प. प. to say, declare & गुण-virtue, निर्गुणः, इन्द्रः & गुणी all -पु. लिं. प्र. वि. ए. व. of निर्गुण-worthless- निर्+गुण (निर्-अव्यय-conveys sense of- out of, away from, without, free from), इन्द्र-King of Gods & गुणिन्-a person with virtue, अपि-अव्यय-also, even, and भवेत्-विद्यर्थ तृ. पु. ए. व. of भू-भवति १ ग. प. प. to be, exist, स्वयम्-अव्यय- oneself, one's own, लघुताम्- द्वि. वि. ए. व. of लघुता- contempt, lightness, insignificance याति-वर्त. तृ. पु. ए. व. of या-२ ग. प. प. to go, to come to

यदार्यगर्हितं यद्वा न्यायेन न समार्जितम्।
तस्माद्ग्रासाद् वरं मन्ये मरणं देहिनामिदम् ॥ ९६ ॥ -योगवा. ३. ७६.७

इदम् (ग्रासम्), यद् आर्यगर्हितम् वा यद् न्यायेन न समार्जितम् (अस्ति), तस्माद् ग्रासाद्, देहिनाम् मरणम् वरम् (इति अहम्) मन्ये ॥

This (food), which is not approved by experts or which is not earned honestly, I think death is preferable to living beings than eating this type of food.

इदम् -this, यद्-which, what, आर्यगर्हितम् -censured, not approved by respectable people *(Think Dietary guidelines by Nutritionists)* आर्य-respectable, experts गर्हितम्- censured, reproached - क. भू. धा. वि. of गर्ह्-गर्हते-गर्हयते १ & १० ग. आ. प. to blame, abuse- आर्यैः गर्हितम्-आर्यगर्हितम् -तृ. तत्पुरुष स., समार्जितम् -earned, procured -क. भू. धा. वि. of सं +अर्ज् (अर्ज्-अर्जति १ ग. प. प. to earn, secure, सं (अव्यय) a prefix to verbs or its derivitives - with, together) मरणम्-death & वरम्- adjctv- best, precious, all in प्र. वि. ए. व., वा-अव्यय-or, and, न- no, not, न्यायेन-तृ. वि. ए. व. of न्याय- justice, honesty, proper, तस्माद् & ग्रासाद्-पं. वि. ए. व. of तद्-that & ग्रास-food, mouthful, देहिनाम्-पु. लिं. ष. वि. ए. व. of देहिन्-living being, incarnate, मन्ये- वर्त. प्र. पु. ए. व. of मन्-मन्यते-मनुते ४ & ८ ग. आ. प. to believe, think,

वार्ता च कौतुककरी विमला च विद्या लोकोत्तरः परिमलश्च कुरङ्गनाभेः।
तैलस्य बिन्दुरिव वारिणि दुर्निवारमेतत्त्रयं प्रसरति स्वयमेव भूमौ ॥९७॥

कौतुककरी वार्ता च, विमला विद्या च, कुरङ्गनाभेः लोकोत्तरः परिमलः च, एतत् त्रयम्, वारिणि तैलस्य बिन्दुः इव, स्वयम् एव, दुर्निवारम् भूमौ प्रसरति।

These three - delightful or curious news, pure knowledge and extra ordinary fragrance from the navel of musk-deer- spread in the world, like a drop of oil spreads uncontrolled on its own in the water,.

कौतुककरी- delightful, creating curiosity-कौतुक- curiosity-कौतुक करोति इति-उपपद तत्पुरुष स, वार्ता-news, विमला- pure, clean, विद्या- knowledge, teaching-all in स्त्री. लिं. प्र. वि. ए. व., कुरङ्गनाभेः-पु/स्त्री. लिं. ष. वि. ए. व. of कुरङ्गनाभि- navel of musk-deer- कुरङ्गस्य नाभिः -ष. तत्पुरुष स., लोकोत्तरः-extra ordinary-लोकः/लोकम् -world- उत्तर-adjctv- excellent, superior-लोके उत्तरः - स. तत्पुरुष स., परिमलः- fragrance, perfume, बिन्दुः -drop-all in पु. लिं. प्र. वि. ए. व., च-and, एतत्- न. लिं.-this, त्रयम्-a triad, group of three, वारिणि- न. लिं. स. वि. ए. व. of वारि-water, तैलस्य- न. लिं. ष. वि. ए. व. of तैल-oil इव-अव्यय-like, similar to, स्वयम्-अव्यय-oneself, of its own, एव-अव्यय-just, just so, only, दुर्निवारम्- difficult to be checked, invincible-दुर् -अव्यय- prefix used in the sense- bad, hard, difficult, भूमौ-स्त्री. लिं. स. वि. ए. व. of भूमि-earth, land, प्रसरति- वर्त. तृ. पु. ए. व. of प्र+सृ- to spread-सृ-सरति-सिसर्ति १ & ३ ग. प. प. to go, move, go towards

शरीरस्य गुणानां च दूरमत्यंतमंतरम् ।
शरीरं क्षणविध्वंसि कल्पांतस्थायिनो गुणाः ॥९८॥ - हितोपदेश, मित्रलाभ

.
शरीरस्य गुणानां च दूरम् अत्यंतम् अन्तरम् (अस्ति) । शरीरम् क्षणविध्वंसि (भवति) । गुणाः कल्पांतस्थायिनः (भवन्ति) ॥

There is a great difference between the body and (its) virtues. The body is short lived, whereas, the virtues stay till the end of the world.

शरीरस्य-न. लिं. ष. वि. ए. व. of शरीर-body, गुणानाम्-न. लिं. ष. वि. ब. व. of गुण- virtue, good quality, च-and, दूरम्- distance, far, अत्यंतम्- अव्यय- excessively, very much, अन्तरम्-difference शरीरम्-body- all in न. लिं. प्र. वि. ए. व., क्षणविध्वंसि-न. लिं. प्र. वि ए. व. of क्षणविध्वंसिन्- momentary, short lived- क्षण- moment-विध्वंसिन्-being ruined, कल्पांतस्थायिनः & गुणाः -पु. लिं. प्र. वि. ब. व. of कल्पांतस्थायिन्-staying till the end of the world, कल्प-1000 Yugas -कल्पस्य अन्तः-कल्पान्तः -ष. तत्पुरुष स. कल्पान्तपर्यंतम् तिष्ठति इति-कल्पांतस्थायिन्, उपपद तत्पुरुष स.

सकृदपि दृष्ट्वा पुरुषं विबुधाः जानन्ति सारतां तस्य ।
हस्ततुलयाऽपि निपुणाः पलप्रमाणं विजानन्ति ॥९९॥

विबुधाः, पुरुषम् सकृत् अपि दृष्ट्वा, तस्य सारताम् जानन्ति। निपुणाः पलप्रमाणम्, हस्ततुलया अपि विजानन्ति॥

Learned people understand the worth of a person just by seeing him once only. Experienced people can tell the weight (of any item) just by hand weighing!

विबुधाः & निपुणाः - पु. लिं. प्र. वि. ब. व. of विबुध- knowledgeable, wise, learned & निपुण- adjctv- shrewd, experienced sharp, clever, पुरुषम्- पु. लिं. द्वि. वि. ए. व. of पुरुष, सकृत्- अव्यय-once, at one time, अपि- अव्यय-even, also, and, दृष्ट्वा- after seeing- पू. का. वा. त्वान्त धा. सा. अव्यय of दृश्-पश्यति-१ ग. प. प. to see, look at, तस्य- his-पु. लिं. ष. वि. ए. व. of तद्-he, सारताम् -स्त्री. लिं. द्वि. वि. ए. व. of सारता- excellence, strength, soundness- सार-adjctv- excellent, sound, strong, जानन्ति & विजानन्ति- वर्त. तृ. पु. ब. व. of ज्ञा & वि+ज्ञा- to know, understand-ज्ञा- जानाति-जानीते ९ ग. उ. प., पलप्रमाणम् -द्वि. वि. ए. व. of पलप्रमाण- weight- पल- a unit of measure, प्रमाण-measure, quantity- पलस्य प्रमाणम्- पलप्रमाणम् ष. तत्पुरुष स., हस्ततुलया- स्त्री. लिं. तृ. वि. ए. व. of हस्ततुला- hand-balance हस्तः - hand, तुला- balance, weighing device-हस्तः एव तुला- हस्ततुला-अवधारण (dereministic) पूर्वपद कर्मधारय स.

सर्वेषामेव शौचानामर्थशौचं परं स्मृतम् ।
योऽर्थे शुचिर्हि स शुचिर्न मृद्वारिशुचिः शुचिः ॥१००॥ -मनुस्मृति ५.१०५

सर्वेषाम् शौचानाम्, अर्थशौचम् एव परम् स्मृतम् (अस्ति) । यः अर्थे शुचिः (अस्ति), सः हि शुचिः (भवति) । मृद्वारिशुचिः न शुचिः (भवति) ॥

In all types of cleanliness, cleanliness of (honesty in dealing with) money is considered as the best. One, who is honest in dealing with money, is indeed a clean person. Cleaning (the body) with mud and water is no cleaning at all!

सर्वेषाम् & शौचानाम् -न. लिं. ष. वि. ए. व. of सर्व-pronoun-all, entire & शौच- purity, cleansing, honesty, एव- अव्यय-just, just so, only, अर्थ-money, wealth- अर्थे शौचम्- अर्थशौचम् - सप्तमि तत्पु.स. honesty in dealing with money, परम्- the highest, supreme, final, स्मृतम् -न. लिं. प्र. वि. ए. व. of स्मृत- said, laid down- क. भू. धा. वि. of स्मृ -स्मरति १ ग. प. प. to remember, bear in mind, lay down, call upon, यः, सः, शुचिः & मृद्वारिशुचिः- all   पु. लिं. प्र. वि. ए. व. of यद्- who, तद्- he, शुचि- clean person & मृद्वारिशुचि-person having clean body with the help of mud and water- मृद्-स्त्री. लि.-clay, mud, वारि- न. लिं.-water- मृद् च वारि च- मृद्वारि- द्वंद्व स.- मृद्वारिभ्याम् शौचम् करोति इति मृद्वारिशुचिः-उपपद तत्पुरुष स., हि-अव्यय-surely, indeed, अर्थे- in money- स. वि. ए. व. of अर्थ न-no, not

स्वफलनिचयः शाखाभङ्गं करोति वनस्पतेः
गमनमलसं बर्हाटोपः करोति शिखण्डिनः।
चतुरगमनो यो जात्यः अश्वः स गौः इव वाह्यते
गुणवति जने प्रायेणेते गुणाः खलु वैरिणः ॥ १०१ ॥

वनस्पतेः स्वफलनिचयः शाखाभङ्गं करोति। शिखण्डिनः बर्हाटोपः गमनम् अलसम् करोति। यः अश्वः, जात्यः चतुरगमनः, सः गौः इव वाह्यते। प्रायेण, गुणवति जने, एते गुणाः खलु वैरिणः (भवन्ति) ॥

Heavy load of its own fruits causes the branch to break from the tree. The huge spread of peacock's tail makes its movement slow; (thereby endangering its safety). The horse, which is born swift mover, gets loaded like cattle. Perhaps, the (excellent) qualities in qualified persons are indeed their enemies!

वनस्पतेः & शिखण्डिनः-पु. लिं. ष. वि. ए. व. of वनस्पति-large fruit bearing tree & peacock, स्वफलनिचयः, यः, अश्वः, जात्यः, चतुरगमनः, सः, गौः, बर्हाटोपः -पु. लिं. प्र. वि. ए. व. of स्वफलनिचय-load of its own fruits -(स्व-pronoun adjctv- one's own, innate, फल- fruit, निचय-collection, heap, स्वफलनाम् निचयः -ष. तत्पुरुष स.), यद्- who, which, अश्व- horse, जात्य-adjctv-well born, good breed, चतुरगमन- swift goer- चतुर-adjctv- swift, skilful, clever, गमन- goer, mover- यस्य गमन: चतुर: अस्ति स: - बहुव्रीहि स; तद्-he, गो (गौः -Nom) - पु/स्त्री. लिं. -cattle, बर्हाटोप- peacock's tail spread- (बर्हः -peacock's tail- आटोप- spreading expanding, बर्हस्य आटोपः-बर्हाटोपः-ष. तत्पुरुष स.), शाखाभङ्गम्, गमनम् & अलसम् पु. लिं. द्वि. वि. ए. व. of शाखाभङ्ग- breaking of the branch-(शाखा-branch-भङ्ग - breaking, tearing down-शाखायाः भङ्गम्-शाखाभङ्गम्- ष. तत्पुरुष स.), गमन-going, moving & अलस-adjctv-slow, inactive, करोति-वर्त. तृ. पु. ए. व. of कृ-करोति-कुरुते ८ ग. उ. प. to do, make, इव-अव्यय- like, similar to, वाह्यते-gets loaded, made to carry- कर्मणि प्रयोग of वह्-वहति-ते १ ग. उ. प. to carry, bear, प्रायेण-अव्यय- perhaps, mostly, generally, गुणवति & जने- पु. लिं. स. वि. ए. व. of गुणवान्-virtuous, qualified & जन-person, एते , गुणाः & वैरिणः --पु. लिं. प्र. वि. ब. व. of एतद्- this, गुण-virtue, quality & वैरिन्- enemy, खलु-अव्यय-surely, indeed

अज्ञस्याप्रबुध्दस्य 'सर्वम् ब्रह्मेति' यो वदेत्।
महानरकजालेषु स तेन विनियोजितः ॥ १०२॥ -योगवा. ४-३९-२४

यः, अज्ञस्य, अप्रबुध्दस्य, 'सर्वम् ब्रह्म' इति वदेत्, सः तेन महा-नरक-जालेषु विनियोजितः (भवति) ॥

One who, preaches to an ignorant and immature person (philosophy of) 'Everything is Brahman', is assigned to a net of tormenting hell by him.

यः, सः & विनियोजितः -all पु. लिं. प्र. वि. ए. व. of यद्-who, which, तद्- he & विनियोजित- assigned, engaged, employed- (प्रयोजक क. भू. धा. वि. of विनि+युज्- विनियोजयति-ते- (युज्- युनक्ति-युंक्ते-७ ग. उ. प. to connect, join), अज्ञस्य & अप्रबुध्दस्य- पु. लिं. ष. वि. ए. व. of अज्ञ- ignorant, foolish & अप्रबुध्द- immature, not grown- न प्रबुध्द-नञ्तत्पुरुष स., सर्वम् - pronominal adjctv- whole, entire, ब्रह्म -पु. लिं. प्र. वि. ए. व. of ब्रह्मन्- 'Supreme Being', 'material cause of the visible universe, 'all pervading spirit of the universe', इति- अव्यय- thus, in this manner, as follows, वदेत्- विध्यर्थ तृ. पु. ए. व. of वद्-वदति १ ग. प. प. to say, speak, तेन-by him- पु. लिं. तृ. वि. ए. व. of तद्-he, महानरकजालेषु-स. वि. ब. व. of महानरकजाल-net of tormenting hell- महा-great, excessive, severe, नरक-hell, जाल-net- महान् नरक- महानरक- वि.पु.प.कर्मधारय., महानरकस्य जालः -महानरकजाल-ष. तत्पुरुष स.

अलब्धज्ञानदृष्टीनां क्रिया पुत्र परायणम् ।
यस्य नास्त्यम्बरं पट्टं कम्बलं किं त्यजत्यसौ ॥ १०३ ॥ -योगवा. ६-८७-१७
(Said to Rama by Vashisht Rushi)

पुत्र, अलब्ध-ज्ञान-दृष्टीनाम् क्रिया परायणम् (भवति)। यस्य अम्बरम् पट्टम् न अस्ति, असौ किम् कम्बलम् त्यजति ?

Son, those who are deprived of knowledge, have to depend on doing (menial) work. One, who does not have a (fine) silk garment, will he give up his cheap blanket?

पुत्र- son- स. वि. ए. व., अलब्धज्ञानदृष्टीनाम् -पु. लिं. ष. वि. ब. व. of अलब्धज्ञानदृष्टि -अलब्ध-not gotten- न लब्ध-नञ्तत्पुरुष स. -लब्ध- acquired, gained- क. भू. धा. वि. of लभ्-लभते १ ग. आ. प. to get, ज्ञान- knowledge, दृष्टि- sight, vision, ज्ञानस्य दृष्टिः -ज्ञानदृष्टि -ष. तत्पुरुष स., अलब्धः ज्ञानदृष्टिः इति-अलब्धज्ञानदृष्टिः - वि.पु.प.कर्मधारय स., क्रिया-work, service, labour, परायणम्- dependence, (पर-adjctv-other, different +अयन or अयण-adjctv-going, moving), यस्य- पु. लिं. ष. वि. ए. व. of यद्-who, which, अम्बरम्- clothing, dress, पट्टम्- silk garment, fine cloth, न- no, not, अस्ति & त्यजति- वर्त. तृ. पु. ए. व. of अस्-२ ग. प. प. to be, exist & त्यज्- १ ग. प. प. to leave, forgo, असौ --पु. लिं. प्र. वि. ए. व. of अदस्- he, that person, किम्- who (used interrogatively) -कम्बलम् -cheap woolen blanket used by poor.

अव्याकरणमधीतं भिन्नद्रोण्या तरंगिणीतरणम् ।
भेषजमपथ्यसहितं त्रयमिदमकृतं वरं न कृतम् ॥१०४॥- सुभाषितरत्न भाण्डागारं

अधीतम् अव्याकरणम्, भिन्न-द्रोण्या तरंगिणी-तरणम्, अपथ्य-सहितम् भेषजम्, इदम् त्रयम् अकृतं वरं न कृतम्।

It is better not to do these three things (at all) than doing them (in a nonbeneficial way)!
- Studying (a language) without its grammar, crossings a river by a boat with a hole and taking medicine without proper diet!

अधीतम् ,अव्याकरणम्, तरंगिणीतरणम्, अपथ्यसहितम्, भेषजम्, इदम्, त्रयम्, अकृतम्, वरम्, कृतम् - all in न. लिं. प्र. वि. ए. व. of- अधीत-study- (क. भू. धा. वि. of अधि+इ-आ. प. to study, learn- इ-एति २ ग. प. प. to go, to go to, to come to), व्याकरणम्- grammar- न व्याकरणम् - अव्याकरणम्-नञ्तत्पुरुष स.-without grammar, तरंगिणी- a stream, river, तरण-crossing over, तरंगिण्याः तरणम्- तरंगिणीतरणम्- ष. तत्पुरुष स., अपथ्य- unfit, improper, unwholesome, पथ्य-adjv beneficial, diet, advice न पथ्य -अपथ्य नञ्तत्पुरुष स. सहित -adjctv- with, together with- अपथ्येन सहितम्- अपथ्यसहितम् -तृ. तत्पुरुष स., भेषजम् - medicine, इदम् -this, त्रयम्-a triad, a group of three, कृतम् -done, accomplished- क. भू. धा. वि. of कृ-करोति-कुरुते ८ग. उ. प. to do, make, न कृतम्-अकृतम् -नञ्तत्पुरुष स., वरम्-अव्यय-better than, preferable to, भिन्नद्रोण्या- स्त्री. लिं. तृ. वि. ए. व. of भिन्नद्रोणि-णी- damaged boat- भिन्न -broken, damaged- क. भू. धा. वि. of भिद्-भिनत्ति-भिंत्ते- ७ ग. उ. प. to break, cleave, split, द्रोणि-द्रोणी-स्त्री. लिं. - wooden vessel, boat- भिन्ना द्रोणि-भिन्नद्रोणी- कर्मधारय स., न- no, not

उभाभ्यामेव पक्षाभ्यां यथा खे पक्षिणां गतिः ।
तथैव ज्ञानकर्मभ्यां जायते परमं पदम् ॥१०५॥ - योगवा. १-१-७- वसिष्ठेन रामाय उक्तम्

यथा खे, पक्षिणाम् गतिः उभाभ्याम् पक्षाभ्याम् एव (आप्नोति), तथा एव ज्ञान-कर्मभ्याम् परमं पदम् जायते।

Just the way the birds fly in the sky with the help of both wings, in the same manner, the highest goal can be achieved by combination of the knowledge and the effort.

यथा-just like, how, in which manner & तथा-in the same manner, like that- both-अव्यय, खे- न. लिं. स. वि. ए. व. of खम्-sky, पक्षिणाम् -पु. लिं. ष. वि. ब. व. of पक्षिन्- a bird, उभाभ्याम्, पक्षाभ्याम् & ज्ञानकर्मभ्याम् -all-तृ. वि. द्वि. व. of उभ- pronominal adjctv-both-(used only in द्वि. व.) & पक्ष-पु. लिं.-wing & ज्ञानकर्म-knowledge & action (effort)- ज्ञानम् च कर्मम् च - द्वंद्व स, एव-अव्यय-just, just so, only, गतिः -स्त्री. लिं.-gait, going, moving, परमम्- highest, पदम्-goal, level जायते-वर्त. तृ. पु. ए. व. of जन्- ४ ग. आ. प. to be born or produced, to rise, happen, take place.

एकं हन्यान्न वा हन्यात् इषुर्मुक्तो धनुष्मता।
बुद्धिर्बुद्धिमतौत्सृष्टा हन्याद् राष्ट्रं सराजकम् ॥१०६॥ -महाभा. ५.३३

इषुः धनुष्मता मुक्तः एकम् हन्यात् न वा हन्यात्, बुद्धिः बुद्धिमता उत्सृष्टा, सराजकम् राष्ट्रम् हन्यात्।

An arrow released by an archer may kill a person or it may not. But strategy planned by an intelligent person may destroy entire country, including all kings.

इषुः, मुक्तः, बुद्धिः & उत्सृष्टा- all प्र. वि. ए. व. of इषु-पु. लिं.-an arrow, मुक्त- released, discharged-क. भू. धा. वि. of मुच्-मुंचति-ते ६ ग. उ. प. to set free, release, बुद्धि-स्त्री. लिं. -Perception, intellect, talent, उत्सृष्टा-स्त्री. लिं. - presented, produced, sent forth- क. भू. धा. वि. of उद्+सृज्-(सृज्- सृजति ६ ग. प. प. to create, produce, make), धनुष्मता & बुद्धिमता-पु. लिं. तृ. वि. ए. व. of धनुष्मत्-an archer & बुद्धिमत्- knowledgeable, intellectual, एकम्, सराजकम् & राष्ट्रम्- पु. लिं. द्वि. वि. ए. व. of एक-one, single, सराजक - including all kings-स-अव्यय-a prefix compounded with nouns means- with, together with, possessed of, including, राजक- a number of kings, a collection of sovereins & राष्ट्र- country, हन्यात् -विध्यर्थ तृ. पु. ए. व. of हन्-हन्ति २ ग. प. प. to kill, destroy, न -no, not, वा-अव्यय- or, and